UM SANSKRIT SERIES
No. CXIII.
Śrī Citrodayamañjarī
No. II.

The

SAṄGĪTAKṚTIS

OF

Svati Śrī Rāma Varma Mahārāja

EDITED BY
K. SĀMBAŚIVA ŚĀSTRĪ,
Curator of the Department for the Publication of Oriental Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1932.

All Rights Reserved.]

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ११३.

श्रीचित्रोदयमञ्जरी

ग्रन्थाङ्कः २.

महोन्नतमहामहिमश्री
स्वातिश्रीरामवर्ममहाराजप्रणीताः

सङ्गीतकृतयः

पौरस्त्यग्रन्थप्रकाशनकार्याध्यक्षेण
के. साम्बशिवशास्त्रिणा
संशोधिताः ।

ताश्च
अनन्तशयने
महामहिमश्रीचित्रावतारमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशिताः ।

कोलम्बाब्दाः ११०७, क्रैस्ताब्दाः १९३२

॥ श्रीः ॥

श्रीमूलावनिपालमौलिमणिना सङ्कल्पितश्रीरिव
श्रीमूलात्मजनिस्तथा सहजया लक्ष्म्या च सम्भावितः ।
स्वातिज्योतिरिवोदितः समुदितश्चित्रावतारः स्वयं
मार्ताण्डाग्रसरो विराजति महाराजः स **रामा**भिधः ॥

भास्वद्वर्णमणिः प्रवालमृदुला श्रुत्याद्यलङ्कारिणी
श्रीमद्वञ्चिवसुन्धरानवयशोराशिप्रकाशात्मिका ।
उत्फुल्लत्सुकृतिप्रसाधनधृतामोदोन्नदड्डिण्डिमा
श्रीचित्रोदयमञ्जरी सुमनसां सर्वस्वमुज्जृम्भताम् ॥

के. साम्बशिवशास्त्री.

PREFACE.

These are the famous musical compositions of Svāti Tirunal. whose fragrance has perfumed not only the whole of Travancore, but has spread through the length and breath of enlightened India. These compositions embellished by the power of unrivalled erudition are the treasure-house of sweet sense married to sweeter sound. And these are the compositions which have infused life into the world of Belles-lettres where Poetry has been sweetened by the communion with music. And with these creations that are replete with the essence of aesthetic emotions and transcend the range of Nature's laws, the poet charms and enraptures the world, immersing it in the ecstasy of exclusive bliss and thus effacing the bounds between the Self and the beyond. Even God Śrī Padmanābha seems to have offered himself to his devotee, the poet, fettered as He is by the panegyrics of His numerous virtues and enshrined in the chastening echoes of his inspired genius. These compositions of His Most Gracious Highness Svāti Tirunal Rama Varma Maharaja, which are the embodiment of the bliss of self-realisation have appeared not only in Sanskrit and Malayalam, but in various other languages as well. Of these, those composed in Sanskrit and Malayalam have been published by M. R. Ry., K. Chidambara Vādhyār Avl., B. A., but are not useful to the non-Malayalam-knowing public, as they are in Malayalam characters. There is many a Western and Eastern scholar thirsting like Cātaka birds, for the enjoyment of these ambrosial pieces. And our desire to bring out those musical pieces composed in Sanskrit as a separate publication in Nagari characters has now come to fruition by virtue of a Government order to that effect and we place this edition before the enlightened public.

The biographical sketch of the author famous as the claimant to pre-natal sovereignty, already embodied in the introduction to Upākhyānadvaya is reproduced here.

It is evident from the last stanza,

"स्वातीजातेन चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन लक्ष्मी-
राज्ञीपुत्रेण वञ्चीश्वरकुलजनुषा रामवर्माभिधेन ।
भक्त्युद्रेकेण शश्वद् गुरुवरकृपया निर्मितं चम्पुकाव्यं
स्यानन्दूरेश्वरस्य प्रमितमुपहृतं शं सदालं निदध्यात् ॥"

of the Syānandūrapuravarṇanaprabandha that the poet was the king of Travancore, son of Raṇi Lakṣmi Bai, and born under the asterism of Svāti. And by the juxtaposition and sequential suggestiveness of the attributive phrases,

"चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन लक्ष्मीराज्ञीपुत्रेण"

which indicate according to the maxim "सर्वं वाक्यं सावधारणम्" that "लक्ष्मीराज्ञीपुत्रत्वम्" was subsequent to his being 'चूडाधृत-सरसिजनाभाङ्घ्रियुग्म', it is clear that the king was the claimant to prenatal sovereignty. According to the explanation of the commentator of the treatise "शं सदालं निदध्यात्" indicates through Mudrālaṅkāra the date of completion of the work in the Kali era (1803875 days from the beginning of that era) and the date of the author is thus the first part of the 19th century. Historically this king was the son of Raṇi Lakṣmi Bai and was born in the month of Meṣa in the year 1813 and demised in his 34th year. His father was Raja Raja Varma of the Parpa dynasty (Changanacherry) and his mother died in his second year and his maternal aunt 'Śrī Pārvati Bai' was the regent during his minority. Just as the crescent moon gathers effulgence through the acquisition of fresh digits, he grew up gathering brilliance through his proficiency in all fine arts. His genius and innate aptitude for music and literature, ripened by his education, easily raised him to the position of a great scholar and poet. This poet was in fact a second Creator. He had a rare and perfect mastery over various languages such as Malayalam, Sanskrit, English, Mahratti, Telugu, Kanarese, Tamil and Urdu. His tutor in English and Politics was Mr. Subba Rao, his future Dewan. And it is most astonishing that the knowledge of the science of politics, proficient in tactics and embellished by exceeding courage, valour and heroism emblazed a heart that was imbued with the sweetest poetical fervour. Such great qualities as serenity, magnanimity, compassion, impartiality and imperiousness, illumined his illustrious reign. During the very short period of his life, in the midst of the manifold demands of his kingly office, he attained a unique celebrity as a great man of letters. And his works are:—

1. Śrī Padmanābha Śataka.
2. Syānandūrapuravarṇanaprabandha.
3. Ajāmilopākhyāna

4. Kucelopākhyāna.
5. Saṅgītakṛtis (in Sanskrit and Telugu).
6. Utsavavarṇanaprabandha.
7. Yayāticarita.
8. Bhaktimañjari.

This great and magnanimous king, this great poet has been thus described by me in my Citrābhyudayakāvya.

"पचेलिमैः फलैर्धर्मो भूयः शाखोपशाखया ।
स्वातिक्रममुदाहर्तुं स्वातिक्रममथावहत् ॥

इह कोऽपि महाराजपदवीं स्पृहयन् पुरा ।
स्वातिभावनया सिद्धः स्वातिभूप इति श्रुतिः ॥

बाल एव हि यः प्राप्य लीलया सकलाः कलाः ।
सम्पूर्णमण्डलो राजा गर्भश्रीमानिति श्रुतः ॥

आङ्गलश्रीरिहोत्तुङ्गमङ्गलोपघ्नमञ्जुला ।
विद्यामन्दिरमावास्य यदुपक्रममेधिता ॥

सङ्गीत्यापि च साहित्या स्वयंवृतमहात्मना ।
सारस्वतोऽयं संसारः ससारस्तेन साधितः ॥

पुरा भावनयेवासौ रस्याद्यै रसभावकैः ।
अन्वभूत् परमाह्लादं ब्रह्मास्वादसहोदरम् ॥

आमोदिनी फलवती निखिलास्वादकारिणी ।
श्रीपद्मनाभपादाब्जे यदीया भक्तिमञ्जरी ॥

राज्यभारेऽपि महति कूटयन्त्रानियन्त्रिते ।
स्वतन्त्रः काव्यसाम्राज्यमभूत स्वातिराडयम् ॥"

(Sarga-1. Sloka-35—42.)

When we consider the date of composition of these songs and other treatises and the very early age of the poet, it is possible to imagine him to have been the re-incarnation of some great Yogi who through some casual swerving from his asceticism happened to be born again for the fulfilment of his life; and hence the glory of his achievements during such a limited span of life as vouchsafed to him. He was born on the fifth day of the bright fortnight in the month of Meṣa in 1812 A. D. He began to study English, Urdu, Telugu, Kanarese and Mahratti in his 7th year. In his 13th year in 1825 Colonel Welsh after meeting His Highness expressed his sincere satisfaction and congratulated His Highness, speaking highly of the royal house and of His Highness's privilege of being the ruler of this most beautiful

Indian State. In his 16th year, in the full flush of his youth, he ascended the throne of this prosperous land. By the devotion to Śrī Padmanābha which blessed him with prosperity and by his literary activities that were redolent of the nectarine sweetness of music, he contrived to soften the rigours of regal responsibility. His Highness did not enjoy the exclusive pleasures of selfish luxury, but invited celebrated scholars and poets and musicians from various countries, honoured them duly and shared their joy. His works do not solely comprise sweet and relishable musical compositions but embrace a wider range. For, prompted by such great musicians as Ponniah, Vadivelu and Pazhaniyandi, he composed songs to be sung in dramas on appropriate occasions and those such as "पन्नगेन्द्रशयन" are famous even now, composed in "रागमाला". This work could be classified under three heads namely Kīrtanas, Varnas and Padas. Of these, Kīrtanas are those that are sung in praise of God, particularly his own dynastic deity Śrī Padmanābha and those are—

१ नवरात्रिकीर्तनानि ३. मध्यमकालकीर्तनानि
२, घनरागकीर्तनानि ४. नवरत्नमालिकाकीर्तनानि

and these could again be subdivided.

Varṇas. According to the explanation of Bṛhaddeśi,

"ननु वर्णशब्देन किमुच्यते? वर्णशब्देन गानमभिधीयते"

those Svaras are Varṇas that occur in a song such as the constant, the variable, the ascending and the descending. And the composition of such songs in consonance with the appropriate sense could only be achieved by unique mastery over literary art combined with sound knowledge of the vitals of the science of music.

Padas. These are songs composed in conformity with the canons of dramaturgy and of utility in histrionic art. These are appropriately called Padas as they could be sung in unison with the timings and other appertainances of the temple dance of nautch girls and were then made use of even in foreign countries and held in high esteem.

And these Kīrtnanas, Varṇas and Padas composed in appropriate melodies could be seen in the index itself and so are not elaborated upon.

Thyāgarāja and Jayadeva have impressed the insignia of their names on all their songs, but our own poet, the devotee of Śrī Padmanābha has only impressed the insignia of

his dynastic deity on his songs, endowed with abundant modesty as hē was. But those few songs that are devoid of this symbol such as:—

"दैवि जगज्जननि !" (Gāna-4)
"पाहि मां श्रीवागीश्वरि !" (Gāna-5)
"पाहि तरक्षुपुरालय !" (Gāna-127)

are supposed to have been composed by his court-musicians and have been included in the compilation of his own songs on account of their artistic excellence. This is but in keeping with the magnanimous spirit of His Highness.

Though this work is undertaken on the basis of that in malayalam characters, many readings in it are observed to be incorrect by a comparison with other manuscripts and by the consideration of appropriateness. And when the necessary corrections have been made, the present publication is strictly speaking a new one in every respect. A few such corrections are noted below:—

Page-	Gāna-	Malayalam edition.	Present edition
4-	4-	गुरुकरुणामयि-	कुरु करुणामयि-
5-	6-	देवि ! सदा कुशलम्-	देहि सदा कुशलम्-
6-	6-	द्रुतमलं कुरु-	धूतमलं कुरु-
62-	80-	तापांनेधिनिवहहरण !-	आपन्नाधिनिवहहरण !
90-	117-	प्रह्लादवदनोपात्तप्रति- भयनृहरे !	प्रह्लादावनोपात्तप्रतिभय- नृहरिरूप !
91-	118-	बाहुपरिकलितपरशु- क्रूर !-	बाहुपरिकलितपरशु- कुरङ्ग !
101-	129-	करुणारसराजतपङ्क- भूतचरित !	करुणारसराजदपाङ्ग पूतचरित !

Six other works, belonging to Dr. Rohiṇi Raja, Maṇnoor Maṭom Palace, Mavelikkara, have been utilised in the publication of this edition. These are of various descriptions consisting of printed books, transcripts, and palm-leaf manuscripts. These have been of immense service to us and we take this opportunity to express our deep-felt indebtedness to him for lacing them at our disposal.

Trivandrum } 15-12-1107. } K. SĀMBAŚIVA ŚĀSTRI.

अवतारिका ।

ता इमाः सङ्गीतकृतयः — याभिरिदमखण्डमखण्डं वञ्चिराज्यं न केवलम्, अपितु सकलमेव सहृदयसाम्राज्यभासुरं भारतखण्डमधिवासितम् । यासां चानितरप्राप्यव्युत्पत्तिबलपरिष्कृतानां मधुरतरशब्दार्थनिगुम्फननिलयानामाविर्भावेन सङ्गीतसाहितीसमाश्लेषसरसः सारस्वतः संसारः ससारतामनायि । याः किल नवरसरुचिरा नियतिकृतनियमरहिता निर्मितीरादधत् कविराहादैकरसानुलिप्तं जगदात्मपरविभागशून्यमाकलयंश्चमत्करोति । यास्विव प्रसितो निजापदानगुणगणनिगलितः श्रीपद्मनाभो दासाय कवये समुदितप्रतिभापरिस्पन्दनस्य प्रतिध्वनिमनुरणयंस्तिष्ठते । महोन्नतमहामहिमश्रीस्वातीनक्षत्रजातश्रीरामवर्ममहाराजनामात्मानन्दरसपेशिकास्ता एताः कृतयो न केवलं गैर्वाण्यां, नापिच कैरल्याम्, अपितु विविधासु भाषासु कृतावताराः । तासु गैर्वाण्यां कैरल्यां च कृताकृतयः केरळलिप्या श्रीमद्भिः के. चिदम्बरवाध्यार् बि. ए. बिरुदशालिभिः प्रसाधितास्तदनभिज्ञानां सहृदयानां नोपकाराय पर्याप्ताः । बहवः खलु ते प्राच्याः प्रतीच्याश्च चातका इव तृषिताः समुत्कण्ठन्ते तत्सुधास्वादलोलुपाः । अतो गैर्वाण्यां गुम्फिता गीतीः पृथक्कृत्य देवनागरलिप्यां प्रकाशयितुमनसामस्माकं प्रयत्नः साधु सम्मतो राजकीयाधिकारस्य फलात्मना परिणतः सद्यः सतां समक्षमवतरति ।

आसां सङ्गीतकृतीनां कर्ता गर्भश्रीमानिति सुप्रसिद्धो महोन्नतमहामहिमशाली स्वातिश्रीरामवर्ममहाराजः कदा स्वकीयेनावतारेण भुवमभूषयदित्यादि जीवितचरितमदसीयोपाख्यानद्वयस्योपोद्धाते समुट्टङ्कितमिह प्रतिरूप्यते —

कविरयं स्वकृतेः स्यानन्दूरपुरवर्णनचम्पूप्रबन्धस्यान्तिमेन —

"स्वातीजातेन चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन लक्ष्मी-
राज्ञीपुत्रेण वञ्चीश्वरकुलजनुषा रामवर्माभिधेन ।
भक्त्युद्रेकेण शश्वद् गुरुवरकृपया निर्मितं चम्पुकाव्यं
स्यानन्दूरेश्वरस्य प्रमितमुपहृतं शं सदालं निदध्यात् ॥"

इति पद्येन स्वातीनक्षत्रजातः लक्ष्मीराज्ञ्याः पुत्रो रामवर्माभिधः श्रीवञ्चिमहाराज इति सिध्यति। अपिच चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन लक्ष्मीराज्ञीपुत्रेणेति विशेषणाभ्यामन्योन्यालिङ्गितार्थप्रतिपादनदिशा घटनापौर्वापर्येण च 'सर्वं वाक्यं सावधारणमि'ति न्यायेन चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन सतैव लक्ष्मीराज्ञीपुत्रत्वे प्रवेश इति सूचयद्भ्यां गर्भश्रीमानयं महाराज इत्यपि सिद्धम्। "शं सदालं निदध्याद् इत्यनेन कलिदिनारम्भात् प्रभृति त्रिसहस्राष्टशतपञ्चसप्तत्यधिकाष्टादशलक्ष(१८०३८७५)दिवसेषु गतेष्वेतत्प्रबन्धसमाप्तिरिति सूचनाद् मुद्रालङ्कार" इति तत्पद्यव्याख्यातृरीत्या क्रिस्तीयैकोनविंशशताब्द्याः पूर्वभागोऽस्य कवेर्जीवितसमय इति लभ्यते। निष्कृष्य चरित्रदिशा १८१३—तमसंवत्सरे मेषमासि लक्ष्मीदेव्यां लब्धावतारोऽयं चतुस्त्रिंशे वयसि स्वर्गमारुरोहेति प्रसिद्धिः। गर्भ एवात्मसमर्पणादिव वत्सरे द्वितीये लक्ष्मीदेव्या मात्रा वियुक्तस्यास्य, पर्पराजवंश्यः श्रीराजराजवर्मदेवः पिता, प्रतिनिधीभूय राज्यं शासती श्रीपार्वतीराज्ञी मातृष्वसा च पोषकौ बभूवतुः। क्रमशः सर्वासु कलासु क्रममाणोऽयं बालचन्द्र इव नचिरात् सम्पूर्णमण्डलो ददृशे। सङ्गीतसाहित्ययो-राजानसिद्धा प्रतिभामुपनायासेन विद्याभ्यासेन समुत्तेजनक्षमेण कमपि महान्तं पण्डितं कविं च चक्रे। कैरळी गैर्वाणी आङ्गली माहाराष्ट्री आन्ध्री कार्णाटी द्राविडी हिन्दुस्थानी इत्याभिरनेकाभिर्भारतीभिरनितरसुलभाभिः स्वयंवृतोऽयं कश्चिदपर एव कविर्ब्रह्माभवत्। किमधिकेन, अमात्यभावी श्रीसुब्बरायोऽस्य आङ्गलविद्यायामनुरूपेषु राज्यतन्त्रकलाकौशलेषु चाचार्योऽभवत्। आश्चर्यमिदमेव तत्र महाराजे काममतिभूमिमगमत्। यत् क्वचन काव्यालापसरससरसेऽपि मानसपञ्जरे कूटप्रयोगकुशलं राज्यतन्त्रविज्ञानमतिवीर्यशौर्यपराक्रमोपस्कृतमैकाधिकरण्येन प्रविवेश। गाम्भीर्यौदार्यदयादाक्षिण्यैकशासनत्वादयो महागुणा अस्य भरणाभरणतां प्रतिपद्य निकामं शुशुभिरे। अतिह्रसीयस्यपि जीवितसमये महति महत्यपि राज्यकार्यवैधुर्ये जाग्रति सरससाहितीकारख्यातेरप्ययमसामान्यं भाजनमासीत्। कृतयश्चास्य —

१. श्रीपद्मनाभशतकम्।
२. स्यानन्दूरपुरवर्णनप्रबन्धः।
३. अजामिलोपाख्यानम्।
४. कुचेलोपाख्यानम्।

५. सङ्गीतकीर्तनानि (संस्कृत-आन्ध्रयादिभाषासु च)।

६. उत्सववर्णनप्रबन्धः (संस्कृतकेरलोभयभाषारूपः)।

७. ययातिचरितम्।

८. भक्तिमञ्जरी।

इत्येताः।

एवमेते महानुभावा महाकवयो महाराजाः श्रीचित्राभ्युदयकाव्येऽस्माभिरुपश्लोकिताः—

"पचेलिमैः फलैर्धर्मो भूयः शाखोपशाखया।
स्वातिक्रममुदाहर्तुं स्वातिक्रममथावहत्॥ ३५॥
इह कोऽपि महाराजपदवीं स्पृहयन् पुरा।
स्वातिभावनयां सिद्धः स्वातिभूत इति श्रुतिः॥ ३६॥
बाल एव हि यः प्राप्य लीलया सकलाः कलाः।
सम्पूर्णमण्डलो राजा गर्भश्रीमानिति श्रुतः॥ ३७॥
आङ्गलश्रीरिहोत्तुङ्गमङ्गलोपघ्नमञ्जुला।
विद्यामन्दिरमावास्य यदुपक्रममेधिता॥ ३८॥
सङ्गीत्यापि च साहित्या स्वयंवृतमहात्मना।
सारस्वतोऽयं संसारः ससारस्तेन साधितः॥ ३९॥
पुरा भावनयेवासौ रव्याद्यै रसभावकैः।
अन्वभूत् परमाह्लादं ब्रह्मास्वादसहोदरम्॥ ४०॥
आमोदिनी फलवती निखिलास्वादकारिणी।
श्रीपद्मनाभपादाब्जे यदीया भक्तिमञ्जरी॥ ४१॥
राज्यभारेऽपि महति कूटयन्त्रनियन्त्रिते।
स्वतन्त्रः काव्यसाम्राज्यमभूत स्वातिराडयम्॥ ४२॥"

(सर्गः १)

प्रस्तुतानां सङ्गीतकृतीनामन्येषां चोपाख्यानादीनां विनिर्मितिवत्सरे पार्यन्तिके च परिमिततमे वयसि पर्यालोच्यमाने निकाममस्य महाकवेर्जीवित-

चर्या पुराजनुषि योगभ्रष्टस्येव कस्यचन तत्तादृगपदानसम्पदनुभवमात्रावशेषा पर्यणंस्तेति शक्यमभ्यूहितुम् । तथाहि — १८१३तमे क्रिस्त्वब्दे मेषमासि शुक्लपञ्चम्यां लब्धावतारोऽयं सप्तमे वयसि आङ्गलीं, हिन्दुस्थानीं, तैलङ्गवीं, कार्णाटीं, माहाराष्ट्रीं च भाषां परिशीलयितुं कृतारम्भ आसीत् । १८२६तमे संवत्सरे त्रयोदशे वयसि श्रीमान् कर्णल् वेल्ष्नामा प्रभुरिमं संपश्यन् अत्यन्तं संतृप्तमनास्तादात्विकीं राजकुटुम्बस्थितिं राजकुमारस्य भारतखण्डान्तर्गतरमणीयतमश्रीवञ्चिभूमिनाथत्वं च परस्परबन्धपर्याप्तं मन्यमानः सुतरामभिननन्द । सोऽयं प्रतिनवशुभोदयशंसिनि भूमण्डले नवयौवनारम्भरमणीये षोडशे वयसि राज्यलक्ष्म्याः करं जग्राह । परुषतरपृथ्वीभरणक्लेशशर्करिलं मानसमतिललितलक्ष्मीकटाक्षनिक्षेपायितया श्रीपद्मनाभभक्तिमञ्जर्या, मधुमधुरसङ्गीतसुगन्धिना साहित्यरसनिःष्यन्देन च मृदूकृत्य सुखसञ्चारसुन्दरमतानीत् । न केवलमात्मारामः सुखमनन्यवेद्यमन्वभूदेष महाराजः, किन्तु तत्तद्देशीयान् पण्डितान् कवीन् गायकांश्च तत्तान् सुप्रसिद्धानानाय्य यथोचितं बहुमान्य च स्वकीयमानन्दातिशयमपरवेद्यमप्यकरोत् । नच केवलमनुभवरसानुलिप्तैरर्थानुध्यानपरिस्पन्दनैरस्य कृतयो नासङ्गीतगन्धयः परन्तु सन्दर्भेषु नाट्यकलानुसम्पुटिता अपि । **वटिवेलु, पोन्नय्य, पलनियाण्टि**प्रभृतिभिर्गायनप्रकाण्डैरुपचोदितोऽयं नाट्यपाठ्यानि पदानि प्रबबन्ध । तानि चाधुनापि प्रथन्ते "पन्नगेन्द्रशयना"-दीनि, यानि रागमालयानुकलितानि ।

सङ्गीतकृतयोऽस्मिन् ग्रन्थे कीर्तन-वर्ण-पदात्मना त्रेधा विभागमर्हन्ति । तत्र कीर्तनानीश्वरस्तोत्रात्मकानि प्रायः स्वकुलदैवतश्रीपद्मनाभपराणि । तानि च —

(१) नवरात्रकीर्तनानि ।	(३) मध्यमकालकीर्तनानि ।
(२) घनरागकीर्तनानि ।	(४) नवरत्नमालिकाकीर्तनानि ।

इति च भूयोऽवान्तरविभागयोग्यानि ।

वर्णाः — "ननु वर्णशब्देन किमुच्यते ? वर्णशब्देन गानमभिधीयते" इति बृहद्देशीवचनात् स्थायिनः, सञ्चारिणः, आरोहिणः, अवरोहिणश्च गानघटिताः स्वरा वर्णाः कथ्यन्ते । अर्थानुगुणतया तादृशं गानगमनमसाधारणेन साहित्यवैदुष्येण सङ्गीतशास्त्रमर्मज्ञतया च परं साध्यम् ।

पदानि — नाट्याभिनयोपयोगीनि भरतशास्त्रसिद्धान्तानुसारीणि गीतानि । ताळमेळसङ्कलनस्थानोचितानीमानि मन्ये साम्प्रतं पदान्येव । क्षेत्रेषु देवदासीलास्यार्थं तदात्वे सप्रयोजनान्यमूनि देशान्तरीयैरपि बाढमादृतानि ।

एतानि कीर्तन-वर्ण-पदानि तत्तदुचितरागरञ्जितानि यथाक्रममनुक्रमणिकादिशैत एव ग्राह्याणि न वितायन्ते ।

त्यागराजजयदेवाविव नाममुद्राङ्किता एव गीती रचितवानप्ययं श्रीपद्मनाभदासः कविरात्मनामग्रहणमकुर्वाणः सर्वतः कुलदैवतस्य श्रीपद्मनाभस्यैव नाममुद्रया विशिष्यते विनयाधिकः । यद्यप्यत्यल्पे कतिचन गीतविशेषाः पद्मनाभमुद्रादरिद्राः —

"देवि ! जगज्जननि !" (गानं ४)

"पाहि मां श्रीवागीश्वरि !" (गानं ५)

"पाहि तरक्षुपुरालय !" (गानं १२७)

इत्यादयस्तेषामेवमुपपत्तिमूहन्तेऽभिवृद्धा आस्थानगायकाः, यद् महाराजोपजीविभिः सरसैरन्यै रचितानां गुणविशेषादात्मीयकोटौ प्रवेशोऽनुमत इति । साम्प्रतमिदं निर्मत्सरे महाराजे सम्भवदुक्तिकं भाति ।

केरळलिप्यां मुद्रितं पुस्तकमाश्रित्य निर्वृत्तेऽप्यस्य प्रसाधने तत्रत्यपाठेषु समनन्तरसम्पादितमातृकान्तरदिशा वस्तुगत्या च नैकेऽवश्यशोधनीया दृष्टाः । तान् यथावदुपशोध्य प्रसाधितोऽयं प्रायेणाभिनवायितः कश्चिदन्य एव ग्रन्थः सम्प्रतिपन्नः ।

उदाहरणार्थं काचिदियं दिक् प्रदर्श्यते —

पृष्ठं.	गानं.	मुद्रितपाठः.	शोधितपाठः.
४	४	गुरु करुणामयि	कुरु करुणामयि
५	६	देवि ! सदा कुशलं	देहि सदा कुशलम्
६	६	द्रुतमलं कुरु	धूतमलं कुरु
६२	८०	तापनिधिनिवहहरण !	आपन्नाधिनिवहहरण !
९०	११७	प्रह्लादवदनोपात्तप्रति-भयनृहरे !	प्रह्लादावनोपात्तप्रति-भयनृहरिरूप !

९१	११८	बाहुपरिकलितपरशु-क्रूर !	बाहुपरिकलितपरशु-कुरङ्ग !
१०१	१२९	करुणारसराजतपङ्क-भूतचरित !	करुणारसराजदपाङ्ग ! पूतचरित

एतत्प्रसाधनकृते कृतावलम्बा अपराः षण् मातृकाः मावेलिक्कर मण्णूरमठं राजमन्दिरात् रोहिणितिरुनाळ्महाशयेन प्रेषिताः । मुद्रितप्रतिरूपितभेदेन पत्राकृतिभिरप्याभिः प्रस्तुतसङ्गीतकृतिप्रसाधनाय सुबहूपकृतमिति दयावतस्तत्स्वामिनः साहायकमनितरसाधारणमनुस्मरन्नेष सहृदयसमक्षमिमाः सङ्गीतकृतीरवतारयामि ।

अनन्तशयनम्,
१५-१२-१०७.

के. साम्बशिवशास्त्री.

विषयानुक्रमणिका ।

॥ श्रीः ॥

महोन्नतमहामहिमश्री

स्वातिश्रीरामवर्मवञ्चिमहाराजप्रणीताः

सङ्गीतकृतयः ।

---

१. कीर्तनानि ।

(१. मङ्गळम् ।)

गानं—१. नाटरागः. झम्पताळः.

(१) जय देवकीकिशोर! जय कोटिस्मराकार!
जय काळिन्दीतटविहार! जय गोपिकाजार! जय जय.

(२) जय मुरळीगानलोल! जय सुवर्णरुचिचेल!
जय सलीलधृतशैल! जय वारिदनील! जय जय.

(३) जय चरित्रधुतपाप! जय खण्डितासुराटोप!
जय यादवकुलदीप! जय गोपालरूप! जय जय.

(४) जय कुटिलासितकेश! जय मुनिमानसनिवेश!
जय पङ्कजनाभाधीश! जय भूमीरमेश! जय जय.

गानं—२. पन्तुवराळी. आदिताळः.

(१) मातङ्गतनयायै मङ्गळम्.
भूयो मनसिजारिकान्तायै मङ्गळम्.

---

१. 'चा' ग. पाठः.

G. P. T. 2011. 500. 22-8-1106. B

(२) बहलकुङ्कुमपङ्कपाटलितकुचायै
महिषासुरहारिण्यै मङ्गळम्.

(३) करिराजगमनायै वरतापससञ्चय-
स्मरणीयचरणायै मङ्गळम्.

(४) *वरनदीतटगायै वनजनाभानुजायै[1]
मरतकमेचकाङ्ग्यै मङ्गळम्.

(२. गणपतिकीर्तनम् ।)

गानं—३. सावेरी. आदिताळः.

पल्लवी. परिपाहि गणाधिप! भासुरमूर्ते!

अनुपल्लवी. शरणागतभरण! सामजोपमसुन्दरास्य! परि

चरणम्. (१) हिमकिरणशकलशेखरतनुभव!
शमलनिवहशमन!
कमलजमुखसुरवृन्दनुतचरित!
कामितपूरकपादसरोरुह! परि

(२) मस्तकविगळितदानजलमिळित-
मधुकरसमुदाय!
हस्तलसितनिजदन्त! महितसुगु-
णाखुवाह! गुहसोदर! निरुपम! परि

(३) पावनपङ्कजनाभमनोहर-
भागिनेय! देव!
सेवकजनततिविद्यासमधिक-
श्रीसुखदायक! भूरिकृपाकर! परि

१. 'ङ्ग्यै मातङ्गतनयायै म' ग. पाठः. २. 'चेम्पट.' क. पाठः.

* वञ्चिराज्यान्तर्गतः 'आर्त्तिङ्कल्' इति प्रसिद्धो देशविशेषः सम्भाव्यते ।

(३. * नवरात्रकीर्त्तनानि ।)

प्रथमम् ।

गानं—४. शङ्कराभरणम्[1]. चेम्पट.

प देवि! जगज्जननि! देहि कृपया मम
तावकचरणभक्तिम् ।

अ. देवमकुटमणिदेदीप्यमानपादे!
केवलानन्दपूर्णे! कीरसुवाणि! वाणि! देवि!

च. (१) वीणापुस्तकरञ्जितकरतलविहसितकञ्जवरेऽम्बिके!
वेणीमञ्जिमपुञ्जविनिर्जितविततघनाघनमालिके!
एणीमदविनिवारणनिपुणतरेक्षणहृतनतपातके!
शाणोल्लीढमहामणिभूषणशालिनि! बुधजनपालिके!
प्रीणितमुनिगेये! द्रुहिणजाये!
परममेये! निरपाये! देवि!

(२) सकलकलालयशारदहिमकरसदृशविलासयुताननने!
मकरवराङ्कशरासनमौर्वीमहिततराळकमोहने!
शुकसनकादिमुनीश्वरविरचितसुन्दरपदयुगपूजने!
विकटजटालसितेन्दुकलापिनि! विमलसरोजवरासने!
विकचकमलपादे! विहतभेदे!
निहतखेदे! भृतमोदे! देवि!

(३) ज्योतिर्मयनवहारायितसज्ज्योतिषतन्त्रविभूषिते!
मातर्मेदुरमीमांसागममांसलितोरुयुगाञ्चिते!
चेतोहरतरशब्दागमकाञ्चीलतिकागुणशोभिते!
पातकहरपाद्मादिपुराणपादितपाणिविराजिते!
वीतशमलहृद्ये! कलितविद्ये!
त्रिजगदाद्ये! निरवद्ये! देवि!

१. 'आदितालः' क. ख. पाठः. २. 'राजित' मुद्रितपाठः. ३. 'लि' क. ख. पाठः. ४. 'ग' मुद्रितपाठः. ५. 'विगत' क. ख. पाठः. ६. 'श्चि' मुद्रितपाठः.

* इह महाराजमन्दिरे नवरात्रमहोत्सवे एकैकस्यां रात्रौ इदमिदं गेयमित्यस्ति सम्प्रदायः । तदनुक्रमेण इमानि नवकीर्त्तनानि योजितानि ॥

च. (४) अरुणतराधरपरिलसदतिमृदुहसितद्युतिपटलोज्ज्वले !
शरणसमागतजनपरिपालनसततोद्यतकरुणाकुले !
परिजनविरचितनवरात्रोत्सवपरितोषितहृदयेऽमले !
कुरु करुणामयि भजनपरे मयि कुन्दमुकुळरदनेऽतुले !
भूरिशुभकराणि अघहराणि
नुतिवराणि करवाणि देवि !

द्वितीयम् ।

गानं—५. कल्याणी. आदितालः.

प. पाहि मां श्रीवागीश्वरि ! पाहि भुवनेश्वरि !

अ. देहि तावकदयांमयि भारति !
देहिबोधसुखदायिकामिह
मोहभारतिमिरसञ्चयामृत-
मूर्त्तिममलबुधलोकविलसित-
मोहनीयकटकाङ्गद भूषितसु-
ग्धगात्रि ! तुहिनांशुवतंसिनि !
बाहुलालसितपुस्तकजपवट-
बन्धुराभयवरे ! परचिन्मयि ! पाहि

च. (१) शारदे ! कचपाशविडम्बितरुचिरतरासितनीरदे !
निजपतिकमलजानिरुपमतरसुखकरणविशारदे !
स्फुटतरधवळिमविलसितमुकुरशकलपटलीरदे ! विनुत-
[नारदे ! (२)
दारुणाधिकरपातकावलीदारणैकनिरते ! सुभाषिणि !
सारसगर्भदळायतलोचनपूरितभक्तमनोरथवल्लरि !
वारणकुम्भमदापहकुचयुग-
भारविनम्रकृशोदरि ! मामक-
करपदमुखसमकरणनिकरमपि
चरणयुगभजनपरामिह कुरु तव पाहि

---

१. 'सिताति' क. पाठः. २. 'यां' मुद्रितपाठः.

च. (२) श्यामळे! बहुळागरुचन्दनमृगमदघुसृणपरीमळे!
परिहृतपदनतपरिजनसमुदयनिखिलमनोमले!
शतमखमुखसुरवरपरिणुतबहुविधचरितेऽमले! मधुरकोमळे!
सामजाधिपमराळिकागतिचारुमन्दगमने! सुहासिनि!
मामकमानसतापसमूहविराममतीव विधातुमये पद-
तामरसद्वयमनुकलये हृदि
तामसदोषविलासनिरासिनि!
समुदयदविकलहिमकररुचिमद-
शमनकरणपटुविमलहसितमुखि! पाहि

(३) भासिते! शुकशौनककौशिकमुखमुनिपरिषदुपासिते!
सहृदयरसकरकविवरनिकरहृदयकमलासिते!
श्रुतियुगपथपथिकनयनपरिलसदरुणसितासिते!
कुसुमवासिते!
भासमाननवरात्रिकोत्सवभावुकापाचितिमोदशालिनि!
भासुरसारसनाञ्चितरत्नविलासविशेषविनिर्जितशक्रश-
रासरुचे! सकलागमरूपिणि!
दासमिमं कृपया शिशिरीकुरु
वस मम सुखमधिरसनमनवरतम्
असदृशविलसितविसरमयि जननि! पाहि

तृतीयम्।

गानं—६. सावेरी. आदितालः.

प. देवि! पावने! सेवे चरणे ते बुधावने
अ. भावुकदायिकटाक्षविलासिनि!
भारति! देहि सदा कुशलं भुवनेश्वरि! देवि!

च. (१) सोमबिम्बमदहरसुमुखि! भक्तजनाखिल-
कामितदाननिरते! कान्तकुन्ददन्ति!

भीमानन्ताज्ञानतिमिरभेदनमिहिरायिते!
मामकहृदि विहर मान्यगुणावासे!
सामजपुङ्गवचारुगते! सुर-
साध्यनुते! विमले! वरदे! भुवनेश्वरि! देवि!

च. (२) वारिदनिभचिकुरे! वासवोपलनयने!
मारशरासनरुचिचोरचिल्लिकान्ते!
सारसकृतनिलये! जाम्बूनदमयभूषे!
नारदादिमुनिनुतनामसमुदाये!
भूरिमनोज्ञकराञ्चितवीणा-
पुस्तकभासिनि! चारुहसे! भुवनेश्वरि! देवि.

(३) पातितदितिसुते! श्रीपद्मनाभविलासिनि!
वीतपापजन[1]गेयविभवे! विद्यारूपे!
चातको जलदमिव सादरमाश्रयामि त्वां
प्रीतिं मयि कुरु लोकमातरयि नित्यं
धूतमलं कुरु मां सदये! परि-
पो[2]षितसूरि[3]गुणे! शुभदे! भुवनेश्वरि! देवि.

चतुर्थम्।

गानं— ७. तोटि. आदितालः.

प. भारति! मामव कृपया नतजनार्त्ति-
भारहरणनिरतया

अ. शारदविधुमण्डलसदृशमनोहरमुखि! भारति!

च. (१) वासवादिसुरवि[4]नुते! तरणिशत-
भासुरभूषणलसिते!
हासजितकुन्दवितते! विमलमुक्ता-
हारकण्ठि! गजेन्द्रगते!

---

१. 'नवि', २. 'तो', ३. 'ग', ४. 'न' क. ख. पाठः.

दासभूतजनविद्यादानलोले ! परदेवि !
भासुरचन्दनमृगमदकुसुमसु-
वासितगात्रि ! सुपावनशीले ! भारति !

च. (२) नारदादिमनोनिलये ! भुवनत्रय-
नायिके ! कृताज्ञानिलये !
चारुबाहुधृतवलये ! विकच-
सारसाक्षि ! तोषितभूवलये !
मारकार्मुकसुषमाचोरचिल्लियुगे ! वाणि !
वारिजभवदयिते ! वरवीणा-
वादनलोलकराङ्गुलिजाले ! भारति !

(३) सकलागममयरूपे ! निखिललोक-
जननि ! सुधामधुरालापे !
अकळङ्कगुणकलापे ! करुणारस-
हृतविवशजनविलापे !
सकले ! पद्मनाभपदसरसिजसेवकवेर-
शुकसनकादिमुनीश्वरविनुते !
सोमकलासदृशामलभाले ! भारति !

पञ्चमम् ।

गानं— ८. भैरवी. त्रिपुटा.

प. जननि ! मामवामेये ! भारति ! जय
सरसिजासनजाये !

अ. अनुपमितकमलावासे ! चारु-
हसितकृतकुन्दनिरासे ! देवि !
मुनिवरेडितविमलचरिते !
मोहनीयगुणौघभरिते ! जननि !

---

१ 'न' मुद्रितपाठः. २ 'परे ! श्रु', ३. 'ल' क. ख. पाठः.

च. (१) तरुण[१]वारिदनिभवेणि ! देवे[२]-
तरुकिसलयोपमपाणि-
कलितवरदाभीतिमुद्रे ! कल्याणि ! पूर्ण-
शरदिन्दुसमकान्ते ! वाणि !
सुरुचिरनयनजितैणि[३] ! परम-
करुणारसशिशिरवेणि !
चरणगतजनभरणनिपुणे !
परमामृतसुमधुर[४]भाषिणि ! जननि !

(२) घनसारतिलकाङ्कितभाले ! अति-
कमनीयविशददुकूले ! विनत-
जनविद्यावितरणलोले ! साधु-
स्मरणीयतमपादमूले !
कनकभूषणे ! शुभशीले ! सर्वा-
गममयि ! सुजनानुकूले !
नानामुनिमनोमयवनजनिलये !
विनिहताश्रितविविधशमले ! जननि !

(३) परिहृतघनाज्ञानखेदे ! कृत-
पद्मनाभसेवकमोदे !
सततपरिचितवीणानिनादे ! मम
कुरु मतिमयि तव पादे
सुरगणमहितविनोदे ! शीत-
करपोतधरे ! गतभेदे !
सदा सरसीरुहमुखि ! सपदि वदने
सरसमिह वस सकलव[५]रदे ! जननि !

---

१. 'णि', २. 'वि' मुद्रितपाठः. ३. 'णि ! देवि ! च', ४. 'रसुभा' क. ख पाठः. ५. 'श' मुद्रितपाठ

षष्ठम् ।

गानं—९. पन्तुवराळी. चेम्पट.

प. सरोरुहासनजाये ! भवति ! समोदमम्ब ! नमामि

अ. पुरन्दरादिसुरोत्तमसुरुचिर-
किरीटमणिकिरणाञ्चितचरणे ! सरोरुहा

च. (१) यामिनीशमनोज्ञतमरुचिभूममदविनिवारणपटुसित-
तामरसमृदुकोटरवासिनि !
सामजराजसदृशगमने !
काममञ्जुशरासननिरुपम-
कान्तिहर[1]चिल्लिचलननिहत-
भीमनिबिडाज्ञानमले !
सुललामशोभिभालतले ! वर-
हेमचारुभूषणलसिते !
मदहीनमौनिहृदयैकपदे ! सुर-
भामिनीनिवहगीतगुणे ! शशि-
धाममन्दहसिते ! जय भगवति ! सरोरुहा

(२) मङ्गळारवशालिवीणासङ्गिकरमृदुळाङ्गुलि[2]दळजित-
तुङ्गकल्पककिसलयनिवहे ! दूरितसेवकतापभरे !
भृङ्गसञ्चयवलयितसुम[3]सुरभीकृतधम्मिल्ल[4]रुचितमद-
भङ्गसजलाम्भोदकुले ! नवपङ्कजोपमनयनयुगे !
लसदङ्गरागघनसारहरिणमद-
हारभासिकुचकुम्भयुगे ! हरि-
पुङ्गवोपमितमध्यतले, परबोधरूपिणि ! परे !
जगदीश्वरि ! सरोरुहा

---

१. 'वि' क. ख. पाठ.. २ 'सि', ३. 'चयभीकलित' मुद्रितपाठः. ४. 'रुचिततिम' क. ख. पाठ..

च. (३) बालचन्द्रवतंसिनि ! परिजन-
पालनैकपरे ! घनपातक-
शैलभिदुरायितचरिते !
करुणालवालायितहृदये !
लोलरुचिराळकपरिवृतसुवि-
शालनिटिलायितवदने !
नालमिह फणिनायकोऽपि वर्ता-
लपितुमयि महिमानं ते
तूलतां नय ममोद्यदविद्या-
जालमाशु ननु भारति ! सकल
भाललोचनमुखाखिलवन्दितप-
द्मनाभपदसेवकनिरते ! सरोरुहा

सप्तमम् ।

गानं—१०. शुद्धसावेरि. अटन्त. (त्रिपुट).

प. जननि ! पाहि सदा जगदीशे ! देवि !
स्मरहरवल्लभे !

अ. अनवद्यतरनवहारालङ्कृते ! मञ्जु-
वनजायतलोचने ! वाहिनीतटवासे ! जननि !

च. (१) शैलराजतनये ! चण्डमुण्डनाशिनि !
शूलशोभितकरे ! सुन्दररूपे !
भालराजितिलके ! परमकृपावति !
पालितसुजनमालिके ! सुर-
सालकिसलयचारुनिजपादे ! जननि !

---

१ 'लरुचिरनिलयायि' मुद्रितपाठः २. 'ल विधुमुखि ! माहिमानं ते तुलयितु
नियमोद्यतवि' क ख. पाठः. ३ 'ऽसे' ख पाठः. ४. '[illegible]' क. ख. पाठः.

च. (२) महितबाहुबलमहिषासुरादि-
गहनदहनायिते! गतमदसेव्ये!
सुहसितजितकुन्दे! शोणजपाधरि!
विहर मम हृदि विधुसदृशमुखि!
बहळमलयजबन्धुरे! लोक- जननि!

(३) परमपावनश्रीपद्मनाभसहोदरि!
नीलचिकुरे! केसरिवरवाहे!
चरितदूरितभक्तदरनिकरे! गौरि!
कुरु कृपां मयि कुलिशधरमुखपरिणुते!
घनदुरितहृतिलोले! जननि!

अष्टमम्।

गानं—११. नाट्टक्कुरुञ्चि. अटताळः.

प. पाहि जननि! सन्ततं मामिहामलपरिणत-
विधुवदने!

अ. देवि! सकलशुभदे! हिमाचलकन्ये!
साहसिकदारुणचण्डमुण्डनाशिनि! पाहि

च. (१) बालसोमधारिणि! परमकृपावति!
नीलवारिदनिभनेत्रे! रुचिरशीले!
भाललसितवरपाटीरतिलके! श्री-
नीलकण्ठदयिते! निगमवनमातङ्गि! पाहि

(२) सुरभिकुसुमराजिशोभितकचवृन्दे!
वरदे! वासवमुखवन्द्यमानचरणे!
अरुणजपाकुसुमाधरे! कौमुदी-
परमोज्ज्वलहसिते! भक्तकल्पवल्लिके! पाहि

---

१. द्विजकु', २ 'रालोके! ज' क. ख. पाठः ३. 'न' मुद्रितपाठः.

च. (३) कमनीयतमरूपे! कन्याकुब्जवासिनि!
शमितपापनिकरे! शान्तहृदयगेहे!
अमितविमलरुचिहारे! नील-
वारिदोपमवेणि! श्रीपद्मनाभसोदरि! पाहि

नवमम्।

गानं—१२. आरभी. आदिताळः.

प. पाहि पर्वतनन्दिनि! मामयि
पार्वणेन्दुसमवदने!

अ. वाहिनीतटनिवासिनि! केसरि-
वाहने! दितिजाळिविदारणे! पाहि

च. (१) जम्भवैरिमुखनते! करि-
कुम्भपीवरकुचविनते! वर-
शम्भुललाटविलोचनपावक-
सम्भवे! समधिकगुणवसते! पाहि

(२) कञ्जदळनिभलोचने! मधु-
मञ्जुतरमृदुभाषणे! मद-
कुञ्जरनायकमृदुगतिमञ्जिम-
भञ्जनातिचणमन्थरगमने! पाहि

(३) चञ्चदळिलाळिताळके! तिल-
काञ्चितशशिकलाळिके! नत-
वञ्चिनृपालकवंशशुभोदय-
सञ्चयैककृतिसततगुणनिके! पाहि

---

१ 'र', २. 'मुखहा', ३. 'णि! गौरि! श्री', ४ 'खा' क. ख. पाठः.
५ 'शधरक' मुद्रितपाठः.

(४. विष्णुकीर्तनानि ।)

(क) विष्णुसामान्यकीर्तनानि ।

गानं—१३. परशु. चापु.

प. पन्नगशयन! पाहि मां

च. (१) पन्नगशयन! पापविमोचन!
खिन्नतानाशन ! केशिनिषूदन! पन्नग

(२) कञ्जविलोचन! कालियदमन!
कुञ्जरगमन! कोमळवदन! पन्नग

(३) अण्डजवाहन! आश्रितपालन!
पाण्डवरञ्जन! पौण्ड्रकभञ्जन! पन्नग

(४) देवकीनन्दन! दैत्यनिषूदन!
पावनचरण! पालितभुवन! पन्नग

(५) गोरसचोरक! गोपिकानायक!
वारिदमेचक! वारणपालक! पन्नग

(६) पञ्चजनान्तक! पादसंसेवक-
वञ्चिभूपालकवाञ्छितदायक! पन्नग

गानं—१४. घण्ट. चेम्पट.[1]

(१) कमलनयन! जगदीश्वर! कमला-
कामुक! मां परिपाहि विभो!

(२) चामीकरघनगर्वहरणचण-
चारुवसन! परिपाहि विभो!

(३) सामजपरिवृढताप[2]सुशमन! जल-
जासनं[3]नुत! परिपाहि विभो!

---

१. 'आदिः', २. 'पश', ३. 'नक्तनमन! प' क. पाठः

(४) विहगवरगमन! देव! निगमतति-
वेद्यचरित! परिपाहि विभो!

(५) दनुजकुलमथन! दीनशरण! भव-
तारकपद! परिपाहि विभो!

(६) गिरिवरधर! फणिवर्यशयन! सुर-
खेदशमन! परिपाहि विभो!

(७) जलधरनिभकाय! रुचिरेन्दिराङ्कविलसित-
चरणजलज! परिपाहि विभो!

(८) मदनजनक! मणिपटलखचितवर-
मकुटलसित! परिपाहि विभो!

(९) नतजनभयहर! विधुमुख! श्री-
पद्मनाभ! मुदा परिपाहि विभो!

गानं—१५. पन्तुवराळी. चेम्पट.

प. परिपालय सरसीरुहलोचन!
भवभयकाननभञ्जन!

च. (१) भानुशर्वरीनाथनेत्रयुग[1]!
पन्नगारिवरवाहन! परि

(२) पादनम्रजनकल्पसाल! नव-
पङ्कजातसदृशानन! परि

(३) गोपवामनयनाकुचमर्दन!
घोरदैत्यकुलनाशन! परि

(४) नीरदाळिघनमेचकाङ्ग[2]!
नीलकण्ठनुत! मोहन! परि

(५) दीनलोकपरिपालक! मुरहर!
दिवसनाथकुलशोभन! परि

---

१. 'नयनवर! प', २. 'भवननी' क पाठः

च. (६) कमलारसाननाब्जमधुप !
दरकण्ठ ! शार्ङ्गशरासन ! परि
(७) श्रीपद्मनाभ ! निखिलदेव-
मुनिसेव्य ! दिव्यगुणभाजन ! परि

गानं—१६. तोटि. अटन्त.

प. सरसिजनाभ ! मुरारे ! पाहि सततं
शमलाद्रिकुलिश ! शौरे !
अ. दरचक्रगदाम्बुजधर ! भूमीरमाकान्त !
सरिदीशकृतावास ! समुदितपरितोष ! सरसिज
च. (१) सुरमुनिभयहर ! शोणपल्लवाधर !
परमकृपारसपरिपूर्णतरापाङ्ग !
मुरवारिदसमीर ! मोहनमणिभूष !
हरिहयमुखविबुधानतपदयुग ! सरसिज
(२) कनकोपमितचेल ! कौरवाकुलपाण्डु-
तनयतापमोचन ! ताराधिपवदन !
मनसिजजनक ! श्रीमधुवनकृतखेल !
वनजारुणचरण ! वासुदेव ! देवेश ! सरसिज
(३) कमनीयतररूप ! कल्याणगुणपूर्ण !
समरागतदानवसमुदायाहिखगेन्द्र !
गमपार्टवनिर्जितगन्धसामजराज !
विमलकुन्दरदन ! वेदान्तागमवेद्य ! सरसिज

गानं—१७. केदारगौळम्. अटन्त.

प. जलजनाभ ! मामव श्रीनायक !
अ. जलदमेचकदेह ! जातरूपभूषण !
सलिलनिधिशयन ! सरसिजदळनेत्र ! जलज

---

१ 'कलक' मुद्रितपाठः. २ 'ङ्गसुश', ३. 'त्रिपुटा.', ४. 'ह', ५. 'य विहगे', ६. 'दविनि' क. पाठः.

च. (१) धरणीभ[1]रसुरा[2]दिदनुजकुलनिधन !
परिधृतमनुजरू[3]पामलमूर्त्ते !
दरतुल्यमनोज्ञकन्धर ! दीनबन्धो !
करुणालय ! मे देव ! कलय कुशलमयि जलज

(२) असिताळकावृततरास्यशीतकिरण !
हसितनिन्दितमुक्ताहार ! देवेश !
लसितपीतवसन ! लम्बवन्यमालिक !
वस मम हृदि नित्यं वारिजासनसेव्य ! जलज

(३) मकरकुण्डलकान्तिमण्डितसुकपोल !
शुकनारदादिसंस्तुतगुणजाल !
विकटतरसंसारविपिनदळनशौण्ड !
सकललोकनायक ! सामजाधिपपाल ! जलज

गानं—१८. नाट्टक्कुरुञ्चि. चेम्पट.

प. जगदीश ! सदा मामव पावनचरित ! देवदेव !

अ. खगवाहन ! सुरशोकविभञ्जन ! कञ्जनाभ !
तनुनिन्दितमनसिज !
विगतशमलमुनिमानसनिवसन !
वेदवेद्य ! कमलाधृतपदयुग ! जगदीश !

च. (१) सुररिपुनिचयपयोदसमीर !
सुन्दरतनुरुचिनिन्दितमार !
चरणनतसकलतापविदार !
चारुमृदुवचन ! मौक्तिकहार !
भरितकरुणनयनान्त ! महेश्वर-
भारतीशनुतदिव्यगुणालय ! जगदीश !

---

१. 'भा' क. पाठः. २ 'दितद', ३. 'चारुवामनमूर्त्ते' मुद्रितपाठः.

च. (२) कलिततटिदुपममोहनचेल!
कम्बुकण्ठ! तुलसीनवमाल!
जलजसमनयन! मङ्गळलील!
साधुलोकशरणोद्धृतशैल!
सलिलराशिशयनाम्बुजकोमळ-
चरणहतशकटदानव! निरुपम! जगदीश

(३) वदनपरिहसितपार्वणसोम!
वासुदेव! रणपातितभौम!
हृदि मम परिलस सम्भृतकाम!
हेममकुट! यदुवीरललाम!
मदनजनक! वरकौस्तुभविलसित!
मान्यशील! मधुसूदन! जय जय जगदीश

गानं—१९. तोटि· चेम्पट.

प. सामोदं कलयामि सरसिजनाभं
अ. भूमिभारहरणं भोगीश्वरशयनं सामोदं

च. (१) रदनजितमौक्तिकं राधाजीवनायकं
मदनजनकमृजुमतिमानसनिलयं
विदलितमधुमुखवैरिदानवकुलं
सदयपोषितगोपजालं सुशीलं सामोदं

(२) दुरितहरचरितं तोषितकुचेलं श्री-
चरणविनतपालं चामीकरवसनं
हरिहयमदहरमम्बुराशिगम्भीरं
तरुणजलजनिभनेत्रं पवित्रं सामोदं

(३) सुमसुरभिलकेशं यमुनाकेलिलोलुभं[२]
कमनीयतरवेणुगानपरायणं

---

१. 'ळस्वच', २. 'पं' क. पाठः.

शमितकालियदर्पं शान्ततापसगेयं
दमितसूनविशिखभासं सुहासं सामोदं

गानं—२०. कल्याणी. अटन्त.

प. परिपाहि मामयि परमपुरुष ! पद्मनाभ !
मुरारे !

अ. शरणागतधरणीसङ्कटभयहर !
मरकतमुखरत्नमकरकुण्डलकर्ण ! परि

च. (१) पूरितसुरजनकामित ! परि-
पूर्णविधुमुखविराजित !
नारदादिमुनीन्द्रसेवित ! विनि-
वारितभयवारणाधिपसन्नुत !
वारिधरनिभदेह[1] ! नुतिपर-
वागधिप ! भवमोहनिरुपम-
भूरितिमिरसमूहदिनकर !
भोगिशय ! खगवाह ! जय जय परि

(२) कालयवनादिकभीषण ! देव !
कौस्तुभमणिवरभूषण !
श्रीललनापरितोषण ! सम-
चेतोहरणचणमञ्जुतरभाषण !
भाललसितललाम ! सरसिज-
पाद ! तनुजितकाम ! परिजन-
जालदुरितविराम ! सुविदित-
शौर्यमुखगुणसीम ! जय जय परि

(३) सेवकजनाभीष्टदायक ! नाथ !
चिन् ! धृतशार्ङ्गसायक !

---

१. 'हरु(वि ? चे) नु' क. पाठः.

पावनतर! लोकनायक! वैरि-
पन्नगसमवायमर्दनविनायक!
भावुककलनलोल! सुविशद-
भाव! बुधजनपाल! निजजन-
तावनविधृतशैल! सुरभिल-
तरणिजातटखेल! जय जय परि

गानं—२१. देवगान्धारं. चेम्पट.[2]

प. पाहि मामयि मुकुन्द! कोमलपङ्कजोपमनयन!
वारिददेह! केशव[1]! नौमि ते पादं

अ. आहवाहत[3]दानवामल-
हार! लीलामानवाधिक-
मोहनीयहरिचन्दनरूषित-
मूर्ते! सकलभुवननायक! पाहि

च. (१) कुन्दसमरद! सुरेशसुम-
वृन्दविराजितकेशामित-
नन्दनीयभव्यसुगुण! शुक-
भृगुनारदादिसेव्य!
मन्दयानजितमत्तमातङ्ग!
मह्लियोगिजनभृङ्गकुलाम्बुज!
मन्दराद्रिधर! तामरसासन-
महादेवनुत! भक्तवत्सल! पाहि

(२) सोमसमानन! शौरे! बल-
सोदर! वरद! मुरारे! वन-
दामशोभिकण्ठ! दीनशरण!
धरणीभारहरण!

---

१. 'पालन' मुद्रितपाठः. २. 'आदिः', ३. 'न', ४. 'वविनु' क. पाठः.

कामिनीनिवहनयनसुमाशुग !
खलधरातनयभेकमहोरग !
यामिनीशरविनेत्रयुगाव्यय !
यदूत्तंस ! कनकवसनलसित ! पाहि

च. (३) भासुरमृगमदभालाखिल-
पालनपर ! गोपाल ! निज-
दाससङ्कल्पसाल !
निरुपमधैर्यसलिलराशे !
वासवाधिहर ! दिव्यमकुटधर !
वचनविजितसुध ! बिम्बफलाधर !
रासकेलिपरितोषितनिजजन !
रमाकान्त ! जलजनाभ ! पर पाहि

गानं २२. कल्याणी. चेम्पट.[2]

पं. पङ्कजलोचन ! पाहि मुरान्तक !
पङ्कजालयाजीवनाथ ! विभो !

अ. शङ्करविधिवलशासननुतगुण !
शं कुरु सततं मे सारसनाभ ! शौरे ! पङ्कज

च. (१) त्रिभुवनघातुकं[3] दितिजं कनककशिपुमभि-
भूय नखरैर्विदीर्य बलाद् रभसेन निज-
पदराजीवनतमेतत्प्रभवं
श्रीनरसिंह ! प्रह्लादं पालितवान् पङ्कज

(२) पितृवचसा समुपेत्य विपिनभुव-
मतिरूपगुणामात्मधर्मपत्नीं
हृतवन्तं दशकण्ठमिषुणैकेन निहत्य
प्रतिगृह्यैनां साकेतं प्राप्त ! श्रीरघुवीर ! पङ्कज

---

१. 'ज' मुद्रितपाठः. २ 'आदिः', ३. 'दा' क. पाठः.

च. (३) सुन्दरतररूप ! नन्दिताभीरनारी-
वृन्दमुखसरसीरुहमधुप !
वृन्दावनान्तकृतविविधसुखविहार !
कुन्दनिभरद ! गोविन्द ! नन्दनन्दन ! पङ्कज

गानं—२३. चेञ्चोट्टि. चेम्पट.

प. कलये श्रीकमलनयनचरणे

अ. कलये कमलासनादिसकलविबुधशरणे कलये

च. (१) भवभयभरहरणे[1] भासुररुचिभरणे
भजनशीलजनमनोभिलषितवरवितरणे कलये

(२) सरसिजमदहरणे साधुमनोविहरणे
सकललोकदुरिताशिगिरिकुलिशप्रहरणे कलये

(३) जगदुरुसुखकरणे जातविपिनचरणे
जलजनाभचरणदासविपुलकुशलकरणे कलये

गानं—२४. तोटि. अटन्त.[2]

प. देवदेव मां पालय सुमहानुभाव ! दीनबन्धो !

अ. पावनतम ! हृतपापानिजपद[3]
सेवकशुभकर ! श्रीमन्नादिकेशव ! देव

च. (१) कुण्डलीन्द्रशयन ! कुरुविन्दोपमरद[4] !
चण्डकेशिमथन ! सरसिजसुनयन !
अण्डजरथ ! मणिहारमुखविमल-
मण्डनधर ! कोटिमारसदृशाकार ! देव

(२) वासवानुज ! मृदुवचनतोषिताशेष !
भासिततटिदाभपरमवसन ! चारु-
हासनिन्दितकुन्द[5] ! हरिमणिनिभ ! कम-
लासनमदहर ! लसितवन्यमालिक ! देव

---

१ 'परिहृ', २. 'त्रिपुटा', ३. 'करप', ४. 'न्दनिभरा', ५. 'मुक्ता[ह]
हृ' क. पाठः.

च. (३) नारदादिमुनीन्द्रनतपादयुग ! विनि-
वारितदनुभव ! वारणेन्द्रगमन !
भूरिविवशजनघोरतापमोचन !
वारणभयहर ! वनजनाभ ! माधव ! देव

गानं—२५. भैरवि. झम्प.

प. भो चिन्तयामि ते पदनीररुहं
निर्जितदेवानोकहपल्लवं

अ. अन्तकारिकमलासनसेवित !
हरे ! रमानायक ! जगदीश्वर ! भो चिन्तयामि

च. (१) कामजनक ! चराचरलोककारणकाय ! तमाल-
श्यामशोभ ! जितेन्द्रियतमवर ! सात्वतगेय !
[सुरार्तिवि-
राम ! देवानन्यशरणजनराजिसहाय ! जगन्नुत !
रामणीयकावास ! वरसुजनस्तोमविधेय ! धरेश !
भूमीघनतरभारनिवारण !
पूतचरित ! परिपालितवारण !
भीमागाधभवाम्बुधितारण !
भीषणपटुविमतौघविदारण ! भो चिन्तयामि

(२) शारदाम्बुजनेत्र ! भुजङ्गमवैरिसुवाह ! नितान्त-
धीर ! वृन्दावनपरिपोषितधेनुसमूह ! पवित्र-
शूरकुल ! वरचन्दनरूषितसुन्दरदेह ! मुकुन्द !
हीरमुखमणिभूषण ! निरुपमचारिमबाह ! यदूत्तम !
घोरामर्षितभौमकृताहव !
भूरिकृपारसपूर्णतरार्णव !
हारालङ्कृत ! दुरितवनीदव !
हाटकाभवसनावृत ! माधव ! भो चिन्तयामि

---

१. 'आदिः', २. 'भरदरवा' क. पाठः.

च. (३) रीणसुकृतजनातिदुराप! सुरेश्वरधृतिद! मनोहर!
पाणिविराजितचक्रगदादरपङ्कज! वरद! सुमधुर-
वेणुगानपरायण! सितकुरुविन्दनिभरद! जपासुम-
शोणिमाधर! केशविनिन्दितसुरुचिरवनद! मनोज्ञ-
वाणीजितवरमधुरसुधारस!
वासुदेव! सममोहन! दरहस!
बाणासुरभुजखण्डन! शुभरस!
पद्मनाभ! मुखविहसितसारस! भो चिन्तयामि

गानं—२६. सुरुटी. अटन्त.

प. तावकपदाम्बुजभजनमेवाखिल-
तापशमनमिति मन्ये

अ. केवलानन्दस्वरूप! सनकमुख-
गीतगुण! जलदाभ! श्रीपद्मनाभ! तावक

च. (१) द्रुपदनृपात्मजा दुश्शासनेन पूर्व-
मपहृताम्बरा विवशा
सपदि चिन्तयन्ती त्वां संवृता त्वया चेलै-
रपरिमितैर्विदधे करुणाजलधे! तावक

(२) परमभागवतो हि प्रह्लादोऽपि तातेन
परमुपद्रुतो देवेश! चरणपङ्कजे तव
चिरं निविष्टमानसो
न रुजां किञ्चिदवाप मङ्गळरूप! तावक

(३) श्रीकराधनोऽपि कुचेलाख्यमहीसुरो
लोकनाथ! पृथुकं
ते किमपि वितीर्य नाकेश्वरवदासी-
दिह चिन्मय! शौरे! देव! मुरारे! तावक

---

१. 'व! नीन्दतसुरुचिरवदन! म', २. तर्म, ३. 'त्रिपुटा' क. पाठः.

गानं—२७ दर्बार्. झम्पट.

प. पालय सदा मामयि माधव! पङ्कजातकोमळनयन!

अ. नीलाम्भोधरमेचकतर! विधि-
नीलकण्ठनुत! दासजनामर-
सालकल्प! श्रीपद्मनाभ!
शौरे! जगदीश! मुरारे! पालय

सा रि स नि स री गा म[2] प धा नी

च. (१) सारसरसरागामयहानि-
धा प धा प धम प धानी सानी
दापदान! समसुधानीकाश!
री स गा रि सा रि नी धपरिसास
वेणुगानलोल! वैरिपरित्रास!
सापधमपगारिस
साधुतमकूपारस! पालय

(२) वारणवरतापशमनचणदय!
वारिराशिकल्पितनिजशयन!
मारकोटिसुन्दर! मुनिहृदयवि-
हार! नागरिपुवाहन! पालय

(३) भूरिमुदितबृन्दारक! हाटकचेल!
श्रीलोल! गोपाल! चारुबाल-
चन्द्रभाल! नववनमाल!
सुजनावनशील! पालय

(ख) विष्णुपरमध्यमकालकीर्तनानि।

गानं—२८. कामोदरी. झम्पट.

प. चारुपङ्कजमृदुतर[3]निजपद! साधुजना-
वनलोलुप! सात्वतवर! मामव

१. 'आदिः', २. 'मा पा ध नी' क. पाठः. ३. 'क' मुद्रितपाठः.

अ. हीरादिमणियुतहेमदिव्यमकुटादिविराजित !
मानिनीनिवहमानसमोहन ! चारु

च. (१) पापहर ! मुनिमतिमणितलिभग ! **माधव** !
वारिदनिभ ! खलभौममर्दन !
सुमुदितबुधमाहेत !
रूपनिन्दितसुमशर ! रुचिरक-
लापधर ! निरुपमगुण ! यदुकुल-
दीप ! विदलितपदनतजनभव-
तापसमुदय ! गिरिधर ! मुरहर ! चारु

(२) वारणाधिपमदहरपटि**मग**-
माखिलनायक ! पन्नगवैरि-
वाहन ! कनकलसितवसन !
भारतीशनिषेवित ! सुविमल-
हारशोभितकन्धर ! रणमुख-
शूर ! मधुवनकलितनिरुपमवि-
हार ! हिमकरसमरुचिसुवदन ! चारु

(३) वामकरतलभुवि **सुमसममग**-
मावहतो वपुरयि तव
वासवानतपदसरसिजयुगल !
मामके हृदि विलसतु जगदभि-
राम ! सुललितमृगमदकलितल-
लाम ! पशुकुलपशुपभयभरवि-
राम ! पङ्कजनाभ ! दयाकर ! चारु

गानं—२९. शङ्कराभरणं. चेम्पट.

प. **सारसभवसे**वितपदयुगलामल-
हिमकरसुवदन ! सरसिजनाभ ! मामव

अ. पारिजातकुसुमपरिमळितचिकुर !
निरुपमगुणगणसागर !
पातकसञ्चयभेदन ! सारस

च. (१) चारुयामुनसैकतविहरण !
शान्ततापसकलित ! मृदुहसित !
मारसुन्दर ! दितिसुतजलधर-
मारुताम्बुधिसम ! भुवनेश्वर ! सारस

(२) गोपधेनुकुलावन ! कबळित-
घोरदावदहनामितविक्रम !
कोपविनिहतपूतन ! गिरिधर !
घोपकमलदिवाकर ! यदुवर ! सारस

(३) नीरजायतलोचनयुग ! धर-
णीरमारमणातिमनोहर !
सारकनकमदापहसुवसन !
शङ्करा भरणालघुनिजभुज ! सारस

गानं -- ३० प. तुवराळी. चेम्पट.

प. सारसाक्ष ! परिपालय मामयि
सन्ततं करुणया जगदीश !

अ. नीरजाञ्जनकाधिकमेचक !
नीरदाभ ! करिनायकभयहर ! सार

च. (१) पादपातिसमदेवनिकाय ! हरे !
शिशुसोममनोहर !
भालदेशविलसितमृगमदतिलक !
सूदितारिगण ! निरुपमबल ! बल-
सोदराङ्गपरिचर्चितचन्दन ! सा

(२) भोग्मिभोगकलितासनिवास ! विभो !
विहगेश्वरवाहन !

---

१. 'द' घ पाठः. २ 'कवि' मुद्रितपाठ .

पूर्णकाम ! कलिदोषविनाशकर !
योगिजातहृदयाम्बुजखेलन !
सागराधिकगभीर ! मुरान्तक ! सार

(३) भीमसेव्यतम ! मङ्गळलील ! मुदा
कुरु मे कुशलं भव-
भीतिनाशनचणाद्भुतगुणनिलय !
भामिनीसमुदयाशयमोहन !
पद्मनाभ ! कमलाधरणीवर ! सार

गानं—३१. आहिरि. चेम्पट.

प. पन्नगेन्द्रशय ! निरुपमगुण ! वसुधा-
कमलावर ! पालय
भानुसोमनयनाम्बुजनाभ ! हरे !

अ. किन्नरीनिवहगीत ! सुपावन-
कीर्तिपूर ! मधुसूदन ! सुरवर-
सन्नताङ्घ्रियुग ! विकसितशरदिज-
सारसानन ! जगत्रयनायक ! पन्न

च. (१) मौनिलोकहृदयाम्बुजविहितनिवास !
कुरुविन्दरदाखिल-
माननीय[1] ! समशोकविनाशकहास !
शरणागतपोषण !
दानवारणमनोहरतरनिजयान !
दीनपरिपालक ! कल्पक-
सूनजातभृशवासितकचभर !
सूरिभीतितिमिरौघदिनेश्वर ! पन्न

(२) नन्दकायुध ! निवारितसुररिपुजाल !
पुरुषोत्तम ! शुकभृगु-

---

१. 'य ! शो' मुद्रितपाठ.

नारदादिपरिणुतबहुविधशुभलील!
कमलासनमदहर!
मन्दरोद्धरणचण! मृदुभाषण!
नन्दगोपतनयामितविक्रम!
नन्दनीयतम! महितविमलनिज-
नामधेय! करुणालय! जयजय पन्न

(३) चारुबिम्बफलरुचिरतराधर! शौरे!
पदपातिजनामर-
साल! नीलजलदोपमशोभ! मुरारे!
विहगाधिपवाहन!
मारकोटिसम! कलितलसितवन-
माल! पीतवसनारुणकौस्तुभ-
हारकङ्कणविराजिततम! परमा-
हरित्रिदशजनपरिवारित! पन्न

गानं—३२. कल्याणी. रूपकम्.

प. सारसलोचन! मामव भो दययामलतम!
सरसिजनाभ!

अ. नीरजशरसुन्दर! निखिलविबुधमुनिभयहर! सारस

च. (१) पापसमूहविभञ्जन! पार्विकसोमसमानन!
माप! निवारितदानव! मान्यगुणातिमनोहर! सारस

(२) भोगिवरेण्यनिवास! विभो! कमलासनपूजित!
नागभयापह! पावननामनिकाय! मुरान्तक! सारस

(३) शेषपुरीश्वर! माधव! सेवकमङ्गलदायक!
भाषणविजितसुधारस! पाटलबिम्बफलाधर! सारस

---

१. 'पार्वसो' मुद्रितपाठ..

गानं— ३३.   दर्बार्.   चेम्पट.

प.   शौरे! वितर कुशलमयि मेऽनिशं सकलजगद्[1]धीश!

अ.   कारुण्यादिगुणालय! कनकाम्बर! सनकादिनिषेवित! शौरे!

च. (१) पालितवारणपरिवृढ! हिमकरभानुनयन! रुचिरलील!
कालकालनुतानघ! कमलावर! शमलापहसुचरित! शौरे!

(२) कामितदायक! मधुहर! तनुजितकाम! वदनविजितसोम!
श्यामदेहरुचे! वरसमरापतदमरान्तकविदलन! शौरे!

(३) नारदशौ[2]नकमुखनुत! सरसिजनाभ! गळविलसितहार!
वारिजायतलोचन! वसुधाभरण! सुधामृदुलवचन! शौरे!

गानं— ३४.   सुरुट्टि.   रूपकम्.

प.   सादरमव सरसिजदलसुनयन! सकल-
सुजनभ[3]यभरहर!

अ.   पादतलनतसुरमुनिसमुदय!
पद्मनाभ! दयाकर! माधव!   सादर

च. (१) गोपहित! करतलधृतगिरिवर!
कुन्दविलसितनिजरद! यदुकुल-
दीप! जलधरसम! मधुरवचन!
दीनजनततिशुभकर! निरुपम!   सादर

(२) घोरभुजबलमगधनृपतिहति-
कोप! सुमगणविलसितकचभर!
श्रीरमण! मृगमदनिटिल! वरद!
सेवकनिकरघनकलुषशमन!   सादर

(३) कामजनक! मम वितर मुरहर!
कामितमहिवरशयन! निरुपम!
भूमिघनभरविदलन! समधिक-
बोधाकर! हिमकरसुवदनवर[4]!   सादर

---

१. 'गदीश', २. 'स', ३. 'भवभयह', ४. 'र सादर। सुजनभय-
भरहर।' मुद्रितपाठः.

गानं—३५. आनन्दभैरवी. चेम्पट.

प. वारिजवदन! दनुजजालकाल!
मामव वरगुणवास!

अ. नारदमुखमुनिजन-
नम्यपाद! फणिवरशय! निरुपम! वारिज

च. (१) पाटलबिम्बविलसदधराविकमेचक! जलधर-
भासुरनिजतनुवरसुषम!
हाटकसुवसनधर! हारकौस्तुभविराजितकन्धर!
हर मम शुचमयि विहगवरतुरग!
सुराधीशमदहर! नाथ! वर- वारिज

(२) वारणभीतिहरणचतुरादृतसज्जन! खलतर-
वैरिनिकरजलधरपवन!
भूरिकरुण! परिजनपुण्यसञ्चय! मुरान्तक! माधव!
रदरुचिविहसितमुकुरशकल! परि-
लसामेय! हृदे सुराधीश! मम वारिज

(३) भानुशशाङ्ककलितनयनामितमङ्गळवितरण!
पावनसुविमलतमचरित!
सूनसुरभिकचभराम्बुरुहनाभ! दयापर!
भवभयहृतिचणचरणजलजयुग!
सदा देहि मम मुदानन्दामेह वारिज

गानं—३६. सौराष्ट्रम्. रूपकम्.

प. दिनमनु हृदि मम विहर विभो समराङ्गणपटुतमे-
दितिसुतकाल! विभो!

अ. वनरुहमदहरनयन! नि-
वारितपाप! रमावर! दिन

---

१. 'रसाधी' घ पाठः. २. 'र' मुद्रितपाठः.

च (१) परमकृपारसभरजलधे ! भासुरतनुसुषम !
हरविधिहरिनुतसुचरित ! हार-
विराजितकन्धर ! गोपरूप !
मुरळीनिनादरासिकातिमञ्जुहास ! दिन

(२) करिवरतापशमन ! भगवन् ! कान्तलळितवदन !
गरुडगमन ! निखिलभुवनकारण !
कौस्तुभशोभित ! भानुकोटिरुचि-
हेमचारुमकुटाङ्गदादियुत ! दिन

(३) फणिशयनामरमुनिशरण ! पङ्कजनाभ ! हरे !
गुणगणविवशिततमसम-
घोषनिवासिजनामल ! सून-
बाणमदहारिदेह ! वरपीतकान्तिपट ! दिन

गानं—३७. मध्यमावती. चेम्पट.

प. सारसमुख ! सरसिजनाभ !
कुरु मुदमयि दिनमनु

अ. वारणघनभयहर ! वचनजालजितसुध !
बुधाविहर ! सारस

च. (१) अमरवरनिकरमकुटरुचिलसित-
विमलचरणपरिहसितसलिलरुह !
शमलकुलजलदपवन ! मृदुळहस !
समरनिहतरिपुसमुदय ! जय जय सारस

(२) सरसघनसदृशकरणनिवह !
वरसरिदधिपशयन ! जनिमृतिभयहर !
हरिहयपुरहरकमलजपरिणुत-
चरित ! कलिकलुषविदलन ! जय जय सारस

---

१. 'सज' मुद्रितपाठः

(३) सनकमुखहृदयकमलमधुप ! कर-
सततकलितदररथचरण ! वरद !
कनकवसन ! समभुवनशरण ! भव-
कदनहरणचण ! यदुवर ! जय जय सरास

गानं—३८. सावेरी· चेम्पट.

प. सारसरसमृदुवचन ! मुदितसकल -
सुरनिकर ! जय सरसिजनाभ !

अ. मारजनक ! कोपाहतपर[1] ! सुकुमार !
विमलसोमोपमसुवदन ! सारस

च. (१) दानवारणसदृशगते !
पदपङ्कजनतवरदानलोलुप ! शुभचरित !
भानुतनयातटविहरण !
भव्यलील ! करुणाकर ! मुरहर !
दानववरघनकाननकुलदव !
सूनलसितचिकुरानतसुखकर ! सारस

(२) नीलवारिदरुचिरतनो !
भुजगाशनरथ ! धरणीभरान्तक ! मृदुहसित !
कालदमनाजनिषेवित !
कामपालसहजातुलभुजबल !
शैलधरण ! सुकपोल ! जितकनक-
चेल ! समभुवनमूल ! फणिशयन ! सारस

(३) कोमळाळकयुतनिटिल ! व्रज-
वासिकृतसुकृत ! कुन्दराजितनिजरदन !
रामणीयकनिवसन ! सम-
कामिनीहृदयमोहन ! निरूपम !
भीमभवभयविराम ! तनुविजित-
काम ! सकलगुणसीम ! हितसुजन ! सारस

---

१. 'गोपाहितवर' क. पाठः.

गानं— ३९. सारङ्गं. चेम्पट.

प. कञ्जनाभ! दयया ममाखिलकामितं वितर
निरुपमगुणवसते!

अ. कुञ्जरेन्द्रघनभीतिविनाशन!
घोषयोषिदखिलाधिशमनपर! कञ्जनाभ!

च. (१) योगिवृन्दकलितेन पदा मम
योजयाशु मतिमुरगशयन! भगवन्!
वागगोचरपदामितविक्रम!
वारिजातरुचिरायतलोचन!
मन्दहासजितकुन्दवर! शर-
दिन्दुसुवदन! मन्दरधरण! कञ्जनाभ!

(२) घोरदैत्यदमनासितवारिद-
कोमळाङ्ग! घनजनिमृतिभयहरण!
मारवैरिकमलासनवासव-
माननीयशुभचरित! मुरान्तक!
कुण्डललसितगण्डयुग! शर-
खण्डितविमतमण्डल! शुभद! कञ्जनाभ!

(३) सूनवासितचिकुराखिलनायक!
शोभनीयमृगमदविलसितनिटिल!
भानुसोमकलितात्मविलोचन!
भारतीशजनकातिमनोहर!
चित्रपरमचरित्र! दुरितल-
वित्र! निरुपमपत्त्रिवररथ! कञ्जनाभ!

गानं— ४०. पूर्वकल्याणी. चेम्पट.

प. देवदेव! जगदीश्वर! जय भुजगाशनवाहन! मुरहर!
दिव्यहारमणिकुण्डलधर! भगवन्!

अ. पावनानुपमनिजभुजाविक्रम !
पद्मनाभ ! वस मे हृदि माधव ! देवदेव!

च. (१) वारणपरिवृढतापशमनचण !
वासवमुखसुरसेवितपदयुग !
दारितमगधमहीप ! यदूत्तम !
तापसहृदयनिवास ! हृतशमल ! देवदेव!

(२) कुन्दविशदरुचिदन्तनिकर ! मुचु-
कुन्दविनुत ! शुभचरित ! सुकृतनिधि-
नन्दतनय ! यमुनातटविहरण !
नामविधुतकलिदोष ! वरसुगुण ! देवदेव!

(३ कालियफणिफणरङ्गकृतनटन !
कामद ! घनधरणीभरनाशन !
सालकनिटिल ! दयाभृतवीक्षण !
शान्तकदननिजदासनिकर ! पर ! देवदेव!

गानं—४१. तोटि. अटन्त.

प. मन्दरधर ! सुन्दरतर ! वसुधा-
भरनाशन ! जगदीश्वर ! जय जय
मारजनक ! सारसनाभ ! विभो !

अ. कुन्दकुसुमवासितचिकुर ! मु-
कुन्द ! विमलगुणगणनिवसन ! मन्दर

च. (१) सुररिपुजनसमुदयभीषण !
सुजनशरण ! मधुमृदुभाषण !
करणविजितघन ! वरभूषण !
गरुडगमन ! करिवरपोषण !
चरणविनतभयहृतिपर ! वर-
करुणारसवरुणालय ! पर ! मन्दर

(२) नवसरसिजसमरुचिरलोचन !
नमननिरतदुरितविमोचन !

भवविविनुतविभव! विरोचन-
भवमदहरसुमहितयाचन!
विविधविमलनिजसुचरित!
विधुवदन! हतकदनामृतकर मन्दर

च. (३) मम कुरु शुभमयि सुखदायक!
मधुमुरसुखफणिखगनायक!
शमितविमतभुजबलसायक!
सकलभुवनकुशलविधायक!
कमलसदृशरुचिपदयुग!
मम सततं कुरु विततं सुखमयि मन्दर

गानं—४२. असावेरी. चेम्पट.[1]

प. पालय माधव! मामनिशं मुदा सुधानिदानमम[2]!

अ. भालतलपरिलसितमञ्जुहरिणमदतिलक!
पन्नगारिवरवाहन! मोहन!
पद्मनाभ! भुवनत्रयनायक! पालय

च. (१) श्रीकरयुगसरसिजसामोदपरिमृदितचरणतल!
चेदिमहीपतनुदलन!
पाकरिपुविनुतगुण! दीनशरण! यदुवर!
भानुभासुरकिरीटशोभित! वि-
भावरीशवदनामलानुपम! पालय

(२) नीलजलदसम! समलोकाधिगणहरणनिपुण[3]! कम-
नीयचरित! मृदुवचन!
शैलधरणहृतमददेवपरिवृढ! सुरुचिर-
सारसायतविलोचन! मञ्जुळ-
सामगानरसिकाभिमनोरम! पालय

---

१. 'आदिः' क. पाठः. २. 'सदानि' ख. पाठः, मुद्रितपाठश्च. ३. साधुलो' क. पाठः.

च. (३) भोगिशयन! नतजनशोकौघविशमन! गुणनिवसन!
बोधमय! भुवनमहित!
नागवरसमगमन! नारदमुखसेवित!
सागरालय! गभीर! नन्दसुत!
सामजेन्द्रवरदार्तसुरागम! पालय

गानं—४३. नीलाम्बरी. चेम्पट.

प. विमलकमलदललसितरुचिरनयन! यदुनन्दन! जय जय
शमलमहितगिरिकुलिश! मदनजनक!
अ. समरचटुलरिपुनिकरशमनपर!
जलजनाभ! वरजलदशोभ! पर! विमल
च. (१) नाकाधीश्वरसुखदायक! लोकेशामृतमृदुभाषण!
राकेन्दुद्युतिवदनाश्रितशोकौघप्रशमनपटुतम! विमल
(२) पापाम्भोधरपवनामरपालोनन्दनिकेतन! बहु-
गोपालवृत! कमलावर! कुन्दात्युज्ज्वलरदभासित! विमल
(३) कालिन्दीतटकृतखेलन! कारुण्याकर! मुरशासन!
हेलानिर्मितभुवनत्रय! हेमाहङ्कृतिशमनाम्बर! विमल

गानं—४४. शुद्धसावेरी. रूपकम्.

प. साहसिकदनुजहर! माधव! निरुपमतम!
सरसिजमदहरसुवदन!
अ. देहविराजितकोमलसौरभचन्दन!
देवराजनतपाद! सरोजनाभ! जगदीश्वर! साह
च. (१) कालियफणकृतनर्तन! कामद! धृतवरमण्डन!
सालकनिटिलतटाञ्चित! शङ्करविधिपरिपूजित! साह
(२) गोकुलकमलदिनेश्वर! घोरभवभयविनाशन!
श्रीकर! शुकसनकादिविचिन्तितपद! परपूरुष! साह

---

१. 'नि' क. पाठः. २. 'मधु' क पाठः मुद्रितपाठश्च. ३. 'श्रीशु' मुद्रितपाठः.

च. (३) केशलसितकुसुममालिक! केशव! भृतकरुणारस!
नाशितसुजनमनोमल! नारदमुखहृदयालय! साह

गानं—४५. भूपालम्. चेम्पट.

प. सामजेन्द्रभीतिहरण! विकासित-
सारसाक्ष! पाहि पाहि वरद! हरे!

अ. भीमवैरिजालहर! तनुविहसित-
काम! पाटलाब्जलसितमृदुपद! साम

च. (१) सारकृपानिलयासितवारिदकाय!
पदसेवकजनसुरसाल! योगिवरनारदतुम्बुरुगेय!
शारदेन्दुमुख! मङ्गलगुणगण!
भारतीशमुखसन्नुत! सुचरित! साम

(२) यामुनसैकतकलितमनोहरलील!
सनकादिकमुनिहृदयाम्बुजनिवसन! देव! कर-
[विधृतशैल!
कामितफलपरिपूरण! घनभव-
काननदव! पुरुषोत्तम! मधुहर! साम

(३) गोपकुमारवृताद्भुततरनिजवेष!
वसुदेवसुतामितकोपसन्दलितपूतन! निजजनपोष!
पापराशिहर! विश्वजनशरण!
पद्मनाभ! शरणागतभयहर! साम

गानं—४६. बेगड. रूपकम्.

प. करुणाकर! माधव! मामव भासुर-
कनकसुरुचिरनिजवसन!

अ. मुरशासन! जगदीश्वर!
मुखनिन्दितशीतरुचे! हरे! सदा जय जय करु

च. (१) पापहरण! मुनिमानितगुणगण! पालितसमभुवन!
गोपतनुधर! कुरु मे कुशलं सततं सुरासुरादि-
[सेवित! करु

(२) पातसुजनगण! मामकहृदि वस भाललसिततिलक!
वीतमदभवविविसेवित! भव्यरुचे! मनोजतात!
[शाश्वत! करु

(३) पादविनतसुगमाहिवरशयन! पङ्कजनाभ! विभो!
सादितविमत! सरसीरुहलोचन! वारणाधिपा-
[धिमोचन! करु

गानं—४७. कल्याणी. रूपकम्.

प. सारससुवदन! महनीयचरित! जय जय
सकलविबुधवरपरिणुत!

अ. मारमण! वरद! जितमायामेय! निखिलजनशरण! सारस

च. (१) दानवसमुदयवनदहनातिमनोहरभाषण!
दान्तमुनिहृदयकृतनिलय!
दीनजनकदनमोचन! धेनुभरण! वरगिरिधर! सारस

(२) कालियफणधरमददमनासितवारिदसन्निभ!
कामजनक! भवभयशमन!
सालकनिटिलविराजितचारुहरिणमदसुन्दर! सारस

(३) पङ्कजरुचिमदहरनयनारिनिषूदन!
शीतलभानुकुलतिलक! फणिशयन!
शङ्करविधिहरिसन्नुत! सारसनाभ! मनोहर! सारस

गानं—४८. यमुनाकल्याणी. रूपकम्.

प. परिपालय सरसीरुहनयन!

अ. चरणं तव कलये हृदि स्मरमोहन! खगवाहन! परि

च. (१) दीनजननिकरदेवतरो !
घनविलसितनिजदेह ! जलजनाभ !
मानितगुण ! रिपुसञ्चय-
मदखण्डन ! पटुभण्डन ! परि

(२) नन्दकविलसितबाहु ! विभो !
पदतलनतशुकनारदमुख ! शौरे !
सुन्दरकुरुविन्दरदन !
सुरनायक ! सुखदायक ! परि

(३) बोधकर ! भुवननाथ ! हरे !
फणिवरशय ! सुकपोल ! रुचिरहास !
श्रीधर ! करुणानिवसन !
श्रितपोषण ! मृदुभाषण ! परि

गानं—४९. कामोदरी. चाप्प्.

प. पदसानितमुनिजनसुगम ! पावनचरित ! करुणाकर !
स्मरसुन्दराङ्ग ! विभावरीशमनोज्ञमुख ! पद

अ. यदुतिलक ! धृतिविजितहिमनग ! मामपा-
रदुरितोरुपयोनिधेरव
पद्मनाभ ! सुरेन्द्रनुत ! पद

च. (१) श्रीरमणातिमञ्जुहसाखिलनाथ ! सुमुदित !
शेषशयन ! लोकगुरो !
नीररुहभवानत ! घोरविमतमदहर !
मारतात ! सुरारिहतिचण ! वारिराशिगभीरतम ! पद

(२) कामितदानलोल ! विभो ! वसुधापते ! वन-
दामलसितकण्ठतल !
भूमिभरहरानघ ! बोधाकर ! वर ! विमल !
कामिनीजनकाम ! रिपुजनभीम ! रुचिरललामधर ! पद

१, 'द' क. पाठः, २. 'स ! श्रि' मुद्रितपाठः.

च. (३) नारदशौनकादिनुत! गरुडासनाखिल-
नम्यचरणवारिरुह!
भूरिविवशपालन! पूर्णशुभनिकेतन!
वारिजाक्ष! दरारिधर! सुकुमार! भण्डनशूरतर! पद

गानं—५०. खमाज्. चेम्पट.

प. सारससममुख! परमव मां
सनकमुखविनुत! सार

अ. पाररहितभवघोरकलुषतर-
वारिराशिपरिपतितमयि सदय! सार

च. (१) कुटिलभुजगवरफणकृतसुरुचिरनटन! देव!
गोकुलकलशपयोनिधिपूर्णशशाङ्क!
निटिलतटलसितमृगमदतिलक! सु-
नीलवारिदशरीर! यदुतिलक! सार

(२) मदनजनक! नवमणिमयसुललितहार! शौरे!
मञ्जुळवचनविमोहितविबुधनिकाय!
पदनतनिखिलमनोरथदायक!
पापजालगिरिकुलिश! सरसतर! सार

(३) सकलभुवनभयहरणपटुचरितजालामेय!
सन्ततं विहर मे मनसीह दयालो!
प्रकटबलदनुजभेदनलोलुप!
पद्मनाभ! भुजगाधिपतिशयन! सार

गानं—५१. भूपाळम्. अटन्त.

प. गोपालक! पाहि मामनिशं तव पदरतमयि गोपा
अ. पापविमोचन! पविधरादिनतपदपल्लव! गोपा

च. (१) साधुकथितमृदशनसरोषभीतमातृवीक्षित-
भूधरजलनिधिमुखबहुविध-
भुवनजाललळितमुखाम्बुज ! गोपा

(२) सारसभवमदहर ! सतीर्थ्यदीनभूसुरार्पित-
पाररहितधनचय ! निरुपम !
पतगराजरथ ! कमलावर ! गोपा

(३) सारसरससुवचन ! सरोजनाभ ! लोकनायक !
भूरिकरुण ! तनुजितमनसिज !
भुजगराजशये[1] ! मुरशासने[2] ! गोपा

गानं—५२. बिहाग्. चाप्प्.

प. स्मरजनक ! शुभचरिताखिललोकनायक ! मामव

अ. तरुणसारसदळनयन ! तपनीयरुचिवसनधर !
तनुविनिन्दितनीरदाद्दतनारदानतभूरिद ! स्मर

च. (१) पापदहन ! सुरविमनपाटनप्रसित[3] !
श्रीपते ! जलनिधिशयन ! भवतापनाशनपटुतर ! स्मर

(२) पावनसुगुण ! निरुपम ! भानुशशिनयन !
देवदेव ! पुरारिकमलजदिविषदधिपतिवन्दित ! स्मर

(३) पालितभुवनसमुदय ! परमपूरुष ! हरे !
भालशोभितसुरभिमृगमद ! पद्मनाभ ! जगन्नुत ! स्मर

गानं — ५३. गौरी. मट्टयम्.

प. सारसदळसुनयन ! सरसकुतुकममरीजनसन्नुत !
जय जय

अ. मारमण ! वरद ! गतमदसेवित ! मदनजनक !
परभीषण ! जलजनाभ ! पर ! सारस

---

१ 'यन ! मु' मुद्रितपाठ २ 'न तानादरितोन्तरि उदनितधित्तिलानतरनातनदरि-धित्तांकिटतकझा झा धित्ताकिटतकझो झों धित्ताकिटतकझो झो । गो' घ पाठ. ३. 'थि' मुद्रितपाठः.

च. (१) विमलविधुवदन ! शुभगुण ! सुमुदितमुनिजन !
विमतदलनपटुभुजबल ! भुजगवरशयन !
कमलभवविनतपदयुग ! सकलजनशरण !
कलुषद[1]वदहन ! मुरहर ! भरितपुरुकरुण ! सारस

(२) धरणिबहु[2]लभरहृतिपर ! मृदुतम[3]विहसित !
तरणिशतलसितसुमकुट ! कटकवलयधर !
गरुडगमन ! घनजनिमृतिहरणचणचरित !
कलितकनकनिभसुवसन ! विनतसमसुखद ! सारस

(३) सुरभिहरिणमदतिलकितनिटिलतट ! परम !
सरसवचनजितमधुरस ! मधुवनविहरण !
सरिदधिपसदृश ! निरुपम ! पुरहरसुमहित !
जनितदितिजभय ! निर[4]वम ! दिश मम शुभमयि[5] सारस

ख. विष्णुपरघनरागकीर्तनानि ।

गानं — ५४. नाट्ट. रूपकम्.

प. पाहि शौरे ! पतगाधिपवाहन ! मृदु-
पाटलपादसरोरुह ! पद्मनाभ !

अ. मोहनतनुरुचिजितकाम ! सुललाम ! रिपुभीम ! भूतकाम !
मुरशासन ! पटुतम ! रथचर[6]णधरण ! पाहि

च. (१) सारसाक्ष ! सरिदीशशयामलमणि-
भूषणभूषित ! पालितसामजेन्द्र !
शारदविधुमुखामलवेष ! धुतदोष ! गत-
रोषामरपोष !
जगदीश्वर ! मृगमदपरिलसितनिटिल !
कुन्दद्युतिमृदुमन्दस्मित ! कुरुविन्दप्रभरद ! पाहि

---

१. 'भ', २. 'हुभ' मुद्रितपाठः. ३. 'र' क. घ पाठ.. ४. 'रुपम' मुद्रित-पाठः. ५. 'यि । तान्ता तकजणुनद्धिमिततकतत्तधिन्नतकदीं तरितरिकिटजणुतरिदीं दींकिट्तकधिंकिट्तधिं किटतधिं । सा' घ. पाठः. ६. 'र । पा' मुद्रितपाठः.

च· (२) देवदेव ! दितिजालिनिषूदन ! मुनिमानसवा-
रिरुहालय ! दीनबन्धो !
पावनतरगुणगणवास ! मृदुहास ! निज-
दासाधिनिरास !
परपूरुष ! विरचय शुभततिमयि मम
जम्भप्रमथनडम्भप्रशमन ! शम्भुप्रविनुत ! पाहि

(३) वासुदेव ! वनदामविराजित ! करुणारस-
सागर[1] पाण्डववन्द्यपाद !
भासितगाङ्गेयोपमचेल ! धृतशैल !
सुकपोलाखिलमूल !
भवमोचन ! जलधरसमरुचिविलसित !
भूमन् ! विहर निकामं मम हृदि भो मञ्जुनयन ! पाहि

गानं—५५. गौळ. झम्पं.

प. कामजनक ! रिपुगणमदहर !
कामितदानलोल ! परिपाहि चारुमुख ! काम

अ. भूमीरमाधिनाथ ! भोगिभोगशयनातिमेचक ! वि-
भो ! मुनीन्द्रततिसेव्यपदयुग ! काम

च· (१) पाटलजपाधरानघ ! भानुशशाङ्कलोचन !
हाटकोपमितचेल ! भूरिरुचि-
हारशोभितगळाम्बुजलोचन ! काम

(२) मोहनकिरीटभासित ! मोदकरात्मभाषण !
देहलालसितदिव्यचन्दन ! सु-
दीनलोकपरिपालनातिचण ! काम

---

१. 'आदिः' क. ख. पाठः. २. 'पा' मुद्रितपाठः.

च. (३) वारणसमा[1]नयान! निवारितपापसञ्चय!
भारतीशमदनाशकातिगुण!
पद्मनाभ! धृतशङ्खचक्रवर[2]! काम

गानं—५६ वराळी. चाप्प्.

प. मामव पद्मनाभ! सदा सुरसाध्यगणबहु-
मान्यचरित! विभो!

अ. भूमीभरहर! नतलोकवरद! मुरहर!
भोगिभोगनिवास! विकसित-
सारसोपमलोचनामल! मामव

च. (१) गोपनिकरवृत! कमनीयसुगुणनिवसन!
घोरदनुजमदहरण! लोकेश!
तापशमन! दीनकुचेलविपुलधनवर-
दानलोल! मनोज्ञतरमुरळीनादविलोलमानस! मामव

(२) केकिपिकनिकरयुतमोहनतममधुवन-
केलिनिरत! मृदुहसित! श्रीकान्त!
पाकनिधनसेवितपदयुगल![3] समुदित-
भानुकोटिविराजितमकुटातिभासित! यादवाधिप! मामव

(३) सोमसदृशमुख! बलदेवसहित! निरुपम-
शोभ! समसुजनशरण! गोपाल!
कामजनक[4]! दारितवैरिनिवह! शुभकर!
कान्तपीतपटातिविलसित! भूरिनीलवराळिसमकच!
[मामव

१. 'मगमन' मुद्रितपाटः. २. 'श' क. ख. पाठ.. ३. 'भिवासि', ४. 'काधरि' मुद्रितपाठ.. ५. 'दि' क ख पाठः.

गानं—५७. आरभी· चेम्पट.[1]

प· श्रीरमण ! विभो ! कलयामि भवन्तमये
श्रितपालनलोलुप ! माधव !
नागभीतिहर ! नागभोगशय ! श्रीरमण !

अ. भूरिकरुणाकर ! पूतनाशकटधेनुकादिहर !
वेणुगानपर ! चारुपिञ्छधर ! श्रीरमण !

च· (१) भाललोचनतामरसासन-
शैलखण्डनसेवितपद ! सुर-
सालकुसुमसुवासितकचभर !
नीलकान्तिघनोपमितसुषम !
कालियोरगफणाञ्चितनर्तन !
कामिनीनिवहमानसमोहन ! श्रीरमण !

(२) वारणेशसमानगमालसु-
दारगुणगणवास ! महीधर-
धीर ! मधुवनकलितमनोज्ञवि-
हार ! यदुकुलभूषण ! मुरहर !
नारदादिमुनियोगिमनोनव-
वारिजातकळहंस ! जनार्दन ! श्रीरमण !

(३) रामसोदर ! दुरितसमूहवि-
रामपटुतम ! जलरुहनयन ! नि-
कामसृदुहस ! निरुपमतम ! वन-
दामविलसितकन्धर ! गिरिधर[2] !
भौमवारिदसमीरण ! सुवदन !
पद्मनाभ ! दरचक्रवरायुध ! श्रीरमण !

---

१ 'आदि.' क. ख. पाठः २. 'बलतर' मुद्रितपाठः.

गानं—५८ श्रीरागम्. चेम्पट.[1]

प. रीणमदादृत! पाहि हरे! जगदीश्वर!
शेषपुरीश! रमेश! गिरीशसुरेश-
विभाव्य! भूरिकरुणाव्ययोरुरस[1]!

अ. बाणभुजखण्डन! पद्मनाभ! नत्रारिदाभ[1]! परि-
पालितेभ! धुतरोषलोभ! जय रीण

च. (१) पापघनसमीर! पादनतभरण! रुचिरकरण!
निखिलशरणातिमोहन!
गोपरूप! धृतदिव्यचापशर!
जातरूपवसनारिभूपहर! रीण

(२) शारदविधुमुख! चारुतररदन! विजितमदन!
मृदुलपद! नारदादिम-
नोनिवास! सितकान्तिहास! परि-
पातदासगण! भो धरासहित! रीण

(३) कामतात! परमकान्त! समवरद! रुचिरशरद-
चिकुरवर! दानसामज-
चारुयान! सुरपाल! हे नरक-
शूरदानवशरीरदारणचण[2]! रीण

गानं — ५९. केदारम्. चाप्प्.

प. सरसीरुहनाभ! मां पाहि श्रीसरसीरुहनाभ!

अ. परमपावनचरित! करुणाभरितसुरमुनिनिकर! जय जय

च. (१) भुजगाधिपशयन! कोमळाम्बुरुहरुचिरनयन!
अजपुरन्दरविनुतशुभगुण! हर ममाखिलदुरितगणमयि

---

१. 'आदिः।' २ 'रणच' क. ख. पाठः.

देव ! दिश मम शुभमपि पाण्डुसुतासमसुखकर[1] !
पीततररुचिरवसन ! सरसी

च. (२) समराहतदनुज ! मन्मथसदृश[2] ! लीलामनुज !
विमलहिमकरलसितसुवदन ! कमलसायकजनक !
[मुरहर !
चारुकुसुमसुरभिकच ! हीरमुखमणिविलसित-
हेममयरुचिरमकुट ! सरसी

(३) गरुडासन ! करुणजिताम्भोधर[3] ! दीनजनशरण[4] !
दरवरोपमितगळ ! लोकेदारसुतविमुखाशयालय[5] !
गोपसमुदयपरिवृत ! कान्तवनविहरण ! बल-
देवयुत ! नरकदमन ! सरसी

गानं—६०. रीतिगौळम्. रूपकम्.

प. परिपालय मां श्रीपद्मनाभ !

अ. शरणागतभरणोत्सुक ! शारदसोमसमानन !
विरिञ्चिसुरेश्वरसेव्य ! परि

च (१) तामरसायतलोचन ! चारुतनो ! धरणीधरधर ! वन-
दामविराजित ! दारुणदनुभवघनविपिनदहन ! परि

(२) दानमतङ्गजचारुविलासगते ! तपनीयवसन ! मुनि-
मानसतामरसालय ! मणिमयमकुटपरिलसित ! परि

(३) नीलघनोपमसुन्दरदेहरुचे ! निखिलामरभयहर !
शैलसुताधवसन्नुत ! शमय मम सकलगदमिह ! परि

गानं — ६१. सारङ्गनाट्ट. रूपकम्.

प. तापशमनं मुदा मयि तरसानिशं जगत्त्रयेश ! दिश

---

१. 'त', २. 'मोहनस', ३. 'रुणाजि' मुद्रितपाठ.. ४ 'नश', ५. 'के' क. ख. पाठ..

अ. मार[1]सुभगतम ! करिभयहर ! सुरमुनिमान्यगुणा-
म्बुजनाभ ! ताप

च. (१) सुरारिवरबलविमथन ! सुधासदृशमृ[2]दुलवचन-
झरीक[3] ! मुनिहृदयनिलय ! सरोजभवविनुतचरित ! ताप

(२) कुचेलघनधनवितरण ! कुबेरसखविनुतचरण !
कचापजितजलदनिवह ! घननीहारविमलहसित ! ताप

(३) रसाबहुलभरविदलन ! रमावदनजलजमधुप !
रसाकर ! खलगिरिकुलिश ! वसानिशमनघ ! मम हृदि
[ताप

(४. ख. श्रीपद्मनाभकीर्तनानि.)

गानं—६२. परजु. चाप्प्.

प. वन्दे सदा पद्मनाभं

अ. पदवन्दारुमन्दारमम्बुधराभं वन्दे

च. (१) कुन्दसमरदनभासं मुचु-
कुन्दनुतं तिलसूनसुनासं
सुन्दरतरदरहासं गुण-
मन्दिरमहिवरमञ्चनिवासं वन्दे

(२) कामितफलदानलोलं हाट-
काटोपहारिमनोहरचेलं
कोमळतिलकनिटालं भव-
तामरसासनसन्नुतलीलं[5] वन्दे

(३) दिव्यचन्दनलिप्तगात्रं विबु-
धेन्द्ररिपुनिचयसालवित्रं
सव्यसाचिवरमित्रं सम-
साधुजनामलपङ्कजमित्रं वन्दे

---

१. 'प ! सु', २. 'मधुव' मुद्रितपाठः. ३. 'गिरिक' ख., 'गिरीशमु' मुद्रितपाठः.
४. 'वनु' क. ख. पाठः. ५. 'शी' मुद्रितपाठः.

गानं—६३. मोहनकल्याणी. चेम्पट.[1]

प. सेवे श्रीकान्तं वरदं

अ देवारातिसमूहकृतान्तं
दीनपालनपरं स्मरकान्तं सेवे

च. (१) कुन्दात्युज्ज्वलतापहहासं
गोपरूपमखिलार्तिनिरास
बृन्दारण्यकृतात्मनिवासं
वीतमलं तिलसूनसुनासं सेवे

(२) नागारातिवरेण्यतुरङ्गं
नारदादिहृदयाम्बुजभृङ्गं
भोगीन्द्राद्भुतमञ्चमभङ्गं
पूर्णशोभपदनिस्सृतगङ्गं सेवे

(३) स्यानन्दूरपुरामलदीपं
सारसाक्षमघशालिदुरापं
भानुशशाङ्कदृशं वसुधापं
पद्मनाभमवितार्यसुधापं सेवे

गानं—६४. गौळिपन्तु. अटन्त.[2]

प. मामवानन्तपद्मनाभानिशं
मान्यगुणनिवास !

अ. सोमबिम्बवदन ! पदविनतजनताशोक-
तिमिरकुलपङ्कजबान्धव ! मामव

च. (१) शातकुम्भमदभरहरचेल !
शतमन्युमुखदेवसमुदयपाल !
घातुकमधुमुखदनुजनिवहकाल !
कालकालविधिसन्नुताद्भुतलील ! मामव

१, 'नम्। आदि.।', २ 'त्रिपुट।' क ख. पाठः.

च. (२) दिनकरतुहिनांशुकलितमञ्जुळनेत्र !
दिव्यमकुटकटकाङ्गदकटिसूत्र !
सनकादिमुनिगणहृदयाम्बुरुहमित्र !
सान्द्रवन्यमालालङ्कृतशुभगात्र !

(३) चारुमन्दहसित ! वचनजितपीयूष !
सर्वलोकमनोहारिरुचिरवेष !
मारजनक ! कृतसमसाधुपरितोष !
महिततरसङ्ग्रामदर्शितनिजरोष !

गानं—६५. आरभी. चेम्पट.

प. पद्मनाभ ! पाहि पद्मविलोचन!
परमपुरुष ! शौरे !

अ. छद्मरहितसनकादिहृदयाब्ज-
सद्मकृतविहरण ! जय जय

च. (१) सरसिजभवनुत ! शमलहरचरित ! शरदिन्दुनिभवदन
नरनारायण ! मधुमथन ! रमावर ! नरकासुरनिषूदन !
कुरु शुभावितातिममेयगुणालय ! कुरुविन्दनिभरदन !
करिवरभयहर ! कनकरुचिरचेल ! कामितफलदायक !

(२) करपरिलसदरिकम्बुगदाम्बुज ! कम्बुसदृशकन्धर !
वरयमुनातटविरचितमुरळीगानवशगतधेनुकुल !
निरवधिपरवशजनतापमोचन ! नीरजारुणचरण !
स्मरकोटिमदहरमोहनतरगात्र ! स्मेरमुखाम्बुरुह !

(३) मुरमुखदनुजाळिरपि भवता खलु मुक्तिमहो गमिता
गरुडगमन ! बत विमुखता मयि श्रुतिकलित! तवानुचि

---

१. 'श्रवि' मुद्रितपाठः. २. 'रोजभ' क. ख पाठः ३. 'समर' पाठ.

उरगशयन! परिपालय मामलमुद्धवमिव सदयं
नरकनिवारण! गोपवधूजननयनामृतावतार!

[जय जय पद्म

गानं—६६. घण्टा. चेम्पट.

प. पालय पङ्कजनाभ! कृपालय!
पालितसुरजाल!
कालदमनविधिवासवसन्नुत!
कनकरुचिरचेल! पालय १
घोरदनुजकुलवीरमर्दन!
गोपालवधूलोल! पालय २
शारदपूर्णनिशाकरसन्निभ-
चारुमुख! सुशील! पालय ३
मुरफणिखगवर! कम्बुलसित-
कन्धर! सुगुणपाल! पालय ४
तरणिहिमकिरणनेत्रयुगल! शुभ-
हरिणमदनिटाल! पालय ५
पाटलबिम्बफलाधर! मोहन!
पावनतरलील! पालय ६
हाटकमञ्जुकिरीट! योगिहृद-
याब्जकलितखेल! पालय ७
भोगिवरशयन! भक्तनिवहघन-
पुण्य! जलदनील! पालय ८
सागरसमगाम्भीर्य! जगत्त्रय-
सार्वभौममूल! पालय ९
मारमणामलमणिमयकुण्डल-
मण्डितसुकपोल! पालय १०
मारजनक! गळभासुरकौस्तुभ-
मञ्जुळवनमाल! पालय ११

सामजभीतिविरामद ! पातक-
जलधरवातूल ! पालय १२
तामरसेक्षण ! कुन्दरदन ! वर-
तापसानुकूल ! पालय १३
आनन्दामृतरूप ! चिदेकर-
सार्णवकल्लोल ! पालय १४
स्यानन्दूरपुरालय ! नतजन-
जालविबुधसाल ! पालय १५

गानं—६७ बिलहरी. अटन्त.

प. सन्ततं भजामीह स्यानन्दूरेश्वर
अ. चिन्तितदायकं चिन्मयाकार सन्ततम्
च. (१) मन्दराद्रिधरमीशं मारजनकममरवृन्द-
वन्दितचरणं विश्वनायकं
दन्दशूकमञ्चवासं दानवाग्निकृपीट
नन्दनीयगुणमब्जसुन्दरनेत्रं सन्ततम्
(२) सामजाधिपवरदं सागरातिगाम्भीर्यं
कामिनीजनमोहनं कोमलवाचं
श्यामवारिधरदेहं शान्ततापसाधारं
वामदेवविधिसेव्यं वासवानुजं सन्ततम्
(३) श्रीनिधिमम्बुजनाभं क्षीरवारिधिशयं
दीनपालनधुरीणं धेनुककालम्
आनतलोकदुरितकाननगणदावं
सूनवासितचिकुरं सोमसमास्यं सन्ततम्

गानं — ६८. मोहनं. चाप्प्.

प. चिन्तये पद्मनाभमुदारं श्रीरसाजीवनायकं

---

१. 'दवा' क. पाठः

अ. अन्तकान्तकमुखाखिलसुरगण-
सन्तताश्रितचरणयुगमिह
सारसायतलोचनं हृदि चिन्तये

च. (१) नन्दनीयघनकान्तिविलासं
कुन्दसूनसदृशोज्ज्वलहासं
दन्दशूकवरमञ्चनिवासं
नन्दकादिहेतिसभासम्
इन्दुबिम्बसमाननं कुरु-
विन्दरदं मुरशासनं भक्त-
वृन्दपालनं घोराजिनिर्मित-
विमतनाशनं जनार्दनं
सुन्दराङ्गविनिर्जिताम्बुधरं
चारुरत्ननिवहशोभिकनककिरीटरत्नधरं
सरसीरुहासनवन्दनीयगुणालयं नव-
सरसीरुहसमचरण नखविधुकिरणपरिहृत-
शरणगतजनदुरिततिमिरमतिभूरिमहस चिन्तये

(२) सामजपरिवृढसङ्कटहरणं
कामहीनवरतापसशरण
क्षेमदानसततोद्यमकरणं
रामणीयकैकशरणं
हेमभूषणभासुरं वन-
दामविराजितकन्धरं सर्व-
कामदं परं लीलाधिकर्पर-
कलितमन्दरं पीताम्बरं
यामिनीशदिनेशनेत्रयुगं
लोकपीडनपरयातुधानकुलासुगणभुजगं
करिहस्तपीवरकोमळोरुयुगाञ्चितं लस-

१ 'र सरसी' क. ख. पाठ..

दमितबलझषकमठकिटिमुखविमलतनुपरि-
शमितखलतरविमतमदभरमनाथभरण चिन्तये

च. (३) घोरघोरभवकाननदहनं
क्षीरवारिनिधिकल्पितशयनं
नारदादिमुनिविरचितमहनं
भूरिपापतूलपवनं
तारमौक्तिकराजितं विश-
दारुणकौस्तुभदीपितं परि-
वारसेवितं भृगुपादलाञ्छित-
वत्सभासितं गरुडासितं
पारिजातसुमादिसुरभिकचं
कोमलाधरजितचारुबिम्बफलातिशोणरुचं
करपद्मधृतदरनीरजारिगदं शुभं श्रुति-
vिततिपठनविवृतवदनशतधृतिनिजवसतिसित-
सरसीरुहसततविलसितसुनाभिकमलं चिन्तये

गानं—६९. शङ्कराभरणम्. रूपकम्.

प. भक्तपरायण! मामवानन्तपद्मनाभ! सततं

अ. मुक्तिद! फणिवरशयन! कृपालय!
मोहनतनुजितमदन! शुभरदन! भक्त

च. (१) नीरजारुणचरण! देवेश! वारणभयहरण!
घोरभवार्णवतारक! मधुकर-
कोमलालकावृतवदन! गरुडासन! भक्त

(२) कामितफलदायक! श्रीभूमीकान्त! भुवननायक!
मामपि तव चरणैकगतिं मुरमर्दन!
करुणामृतेन शिशिरीकुरु भक्त

---

१. 'त', २. 'चाप्पु' क. पाठ. ३. 'ह' क. ख. पाठः.

च. (३) स्यानन्दूरपुरवास! मनोहरचम्पकसुमनास!
सूनसायकतात! विविधमणिखचित-
शोभनपुरटकिरीट! रुचिरहास! भक्त

गानं—७०. मुखारी. झम्प.

प. पाहि सदा पद्मनाभ! पङ्कजाक्ष!
अ. देहि कुशलमनिशं दीनजनवत्सल! पाहि
च. (१) करुणालय[1]! भवदालयगमनविधौ बत मामकं
चरणमिह सकुतुकं कुरु जगदधीश!
मुरमथन! तव चारुमूर्तिदर्शने नयनं
परमुत्सुकमयि परमानन्दरूप! रचय पाहि
(२) करमपिच तव रमेश! परिपूजनविषयेऽनिशं
निरतमिह[2] विभो! कलय नीरदाभकान्ते!
चरणकमलमिलितसुरभितुलसीदलत-
त्परतरां[3] च नासिकां विरचय सुरेश! पाहि
(३) सरसतरकथापीयूषश्रवणे मम कर्णयुगं
कुरु[4] सामोदमपि वितनु परमपूरुष!
सरसीरुहभववासवपरमाविनुतचरित!
सरिदधिपशयन! मे विहर हृदये देव! पाहि

गानं—७१. दशाक्षी. झम्प.

प. सरसीरुहनाभमुदारं कलये
अ. चरणविनतजनविबुधसालं देवं सरसी
च. (१) कमलाकरजलजपरिमृदिततरचरणं
खलदानवकुलदहनमतिविवशशरणम्
अमितामलगुणजलधिमतिरुचिरकरणं
हरवासवविधिविनुतमिभतापहरणं सरसी

---

१ 'कर! भ' मुद्रितपाठ. २ 'कुरु सामोदमपि वितनु परमपुरुष! चरण', ३, 'रा च', ४. 'निरतमिह विभो! कलय नीरदाभकान्ते! सरसी' क. ख. पाठः.

च. (२) भुजगाधिपशयनवरशयितमुरुभासं
भुजराजितरथचरणदरममलहासं
रजनीकरसमवदनमतिमुदितदासं
रतिनायकजनकमृजुमतिहृदयवासं सरसी

(३) करुणाकरममृतमदशमनचणभाषं
कनकोपमवसनमतिरुचिरनिजवेषं
धरणीभारहरमलघुचरितधुतदोषं
तरणिभासुरभूषणमणिलसितदोषं सरसी

गानं—७२. बिलहरी. अटन्त.

प. पाहि सारसनाभ! मामनिशं

अ. देहि ते पदभक्तिं दीनरक्षक! शौरे!
वाहिनीशनन्दिनीवदनाब्जमधुकर!

च. (१) वारिवाहमेचकगात्र!
विकचवारिजातसङ्काशनेत्र!
भारतीशशङ्करभद्रसन्नुतिपात्र!
दारितमधुमुखदानवाखिलगोत्र! पाहि

(२) करपङ्कजविधृतशैल!
शरणागतजनतासुरसाल!
उरगवरशयन! परिधृतवनमाल!
करुणावरुणालय! कनकरुचिरचेल! पाहि

(३) कामकोटिसुन्दरमूर्ते!
देव! खण्डितविबुधजनार्ते!
सामजभयहर! सकलसुगुणपूर्ते!
सामोदं मुनिजनसततगीतकीर्ते! पाहि

१. 'त्रिपुट।' क. ख. पाठः.

गानं—७३. सावेरि. रूपकम्.

प. पाहि मां श्रीपद्मनाभ! भक्तवत्सल!
पावनतरा[1]पदान!

अ. वाहिनीशशयन! मे देहि कामितमखिलं पाहि

च. (१) वारणेन्द्रभयहर[2]! तनुरुचिविहसितरतिवर! वासवा-[धिशमन!
चारुकेयूरकङ्कणविलसितभुजयुग! वरगुण! भूरिकृपा-[जलधे!
नारदादिमुनिमनोवारिजकृतनिलय!
घोरतापत्रयहर! कुन्दमुकुलरदन! पाहि

(२) लोलतरवनमाल! परिजनवरवितरण! लोभनीयभाष!
नीलकुन्तलराजितनिरुपमतरमुखसरसिज! कालकाल-[सेव्य!
शैलवरेण्यधरण! सारसदलनयन!
भालतलविनिन्दितबालचन्द्र! जनार्दन! पाहि

(३) भूमिभारहरणा[3]जिविदलितमधुमुखदितिसुत! पूर्ण-[मोदरूप!
हेमशोभितवसन! करधृतदरजलरुहगद! कामपाला-[वरज!
कोमळपल्लवाधर! गोपकामिनीदयित!
श्यामलवारिददेह! स्यानन्दूरपुरवास! पाहि

गानं—७४. दर्बार्. झम्प.

प. स्मर मानस! पद्मनाभचरणं

अ. तरुणवारिरुहमदहरणचणममलं स्मर

---

१. 'रवदन।', २. 'रण त' क. ख. पाठः. ३. 'ण! वि' मुद्रितपाठः.

च. (१) सनकशुकनारदादिकलितं कमला-
करसरसीरुहसततपरिमृदितं
विधिशङ्करविनतमतिमृदुलमविरतं
वन्दारुजनसुरतरुकिसलयायितं — स्मर

(२) पतगाधिपकरकृतवसनं कालिय-
फणिफणरङ्गरचितशुभनटनं
जलजादिविततांङ्कलसितमतिकमनं
वृन्दावनविरचितशर[1]णम् अघशमनं — स्मर

(३) वररत्नमञ्जीरमुखरं [2]नखमणिशि-
शिरकिरणै[3]हताज्ञानतिमिरं सुमनोज्ञ-
मुरलीगानरचिततालचतुरं जननमृति-
हरणैकसिद्धौषधमजरं — स्मर

गानं—७५. असावेरि. झे[4]म्पट.

प. पाहि पङ्कजनाभ! पाहि पङ्कजनाभ!
भासुरजलदाभ! — पाहि

अ. मोहनमृदुभाषण! नागवैरिवाहन! वरभूषण! दान्ततर!
देहिनिखिलसमीहितसुघटनाहितकरुण!
देहि शुभममराहितविदलनाहिवरशयन!
[वारिरुहनयन! — पाहि

च. (१) करिवरभयहर! कनकरुचिराम्बर!
करधृतदरचक्र! शैलधृतिखण्डितमदशक्र!
चारुतरकरण! परिजनभरण! सुरमुनिशरण!
घनजनिमरणभवभयहरण! कुशलवितरण!
जगदीश! तोषितमहेश! — पाहि

---

१. 'णं श', २. 'दिनम', ३. 'णाज्ञा' मुद्रितपाठः. ४ 'त्रिपुट' क. ख, पाठः.

च. (२) तनुरुचिजितमार! तारमौक्तिकहार!
जनितसात्त्वततोष! श्रीकौस्तुभकनदनुपमवेष!
देवदेव! सनकभृगुमुखमुनिवरनिवहविनुतशुभगुण!
. वनजसमपद! दिनपरिवृढतुहिनकराक्षियुग!
[विधृतविपुलनग! पाहि

(३) कमलाजीवनायक! कलितशार्ङ्गकार्मुक!
शमितकैटभवीर्य! लोकविश्रुत! जलधिसमगाम्भीर्य!
स्यानन्दूरविमलपुर! पदकमलनतजनशमलहुतवह!
कमलशशधरसमलपन! तिलसुमलसितनास!
[कुन्दमृदुहास! पाहि

गानं--७६. मध्यमावति. आदि.

प. भावये पद्मनाभमिहानिशं
भव्यगुणनिलयं

अ. देवमुनिशरणं दीनजनभरणं
भावुकवितरणं पङ्कजेचरणं
पावनाद्भुततरात्मचरित्रं
पापजालघनसाललवित्रं
सेवकाशयपयोरुहमित्रं
चिन्मयं नयनजितशतपत्रं भावये

च. (१) हेमविराजितदिव्यकिरीटं
कोमलमृगमदबिन्दुललाटं
भीमसमरभुवि निकृत्तनिशाटं
भूमिभरासुरवह्निकृपीटं
कामिनीजनमनोहररूपं
खण्डिताखिलचराचरतापं
कामदं सुकृतहीनदुरापं
कम्रहारकटकादिकलापं भावये

---

१. 'लकुसुमसमना', २. 'जातव' क. ख. पाठः. ३. 'मोहनरू' क. पाठ.,

च. (२) वारणशोकपयोदसमीरं
वारिदरुचिरतराभशरीरं
मारजनकमम्भोधिगभीरं
मान्यतरसुजनसेव्यमुदारं
श्रीरसारुचिरकेलिविलासं
क्षीरसागरशयं मृदुहासं
घोरघोरभवतापनिरासं
कुन्दनिन्दकरदामलभासं — भावये

(३) वासवमुखसुरसन्नुतलीलं
भासुरकनकमदापहचेलं
दासजननिवहकल्पकसालं
तापसमानसकल्पितखेलं
वासरेशशतशोभिरथाङ्गं
भासमानखगराजतुरङ्गं
व्यासवर्णितमहत्त्वमभङ्गं
व्यक्तपूर्णकरुणोद्यदपाङ्गं — भावये

गानं—७७. मध्यमावति. आदि.[1]

प. वनजाक्षं चिन्तयेऽहं

अ. जितदनुजं पर्वतभिदनुजं मुकुन्दं — वनजाक्षं

च. (१) विमलतरपार्वणविधुमण्डलसदृशकमनी-
यमुखमनिशममरगन्धर्वा[2]द्यभिनुतमतिनीलं
शातकुम्भोपमितरुचिरचेलं
पदाम्बुजनमनप्रवणपालं पद्मनाभं — वन

---

१. 'त्रिपुट' क पाठः. २. 'र्माश' मुद्रितपाठ.

च. (२) कलशभवशौनककमलासनतनयकलित-
मनुपमशमलघनवल्लीदलनशितकुठारं
नानारत्नोज्ज्वलभूषमुदारं
कृपारसाकुलनेत्रमचलधीरं पद्मनाभं वन

(३) करपरिलसदरिकम्बुगदाम्बुजमुरुपुण्य-
भृतलोकपरिभजनीयापरिमितगुणवासं
कन्दर्पसुन्दरतरतनुभासं
स्यानन्दूरपुरकलिताधिवासं श्रीपद्मनाभं वन

गानं—७८. मुखारि. चाप्पु.

प. पालय श्रीपद्मनाभ! पालितलोक!

अ. बालचन्द्रमदहरभालशोभिमृगमद! पालय

च. (१) उत्तमपुरुष! विभो! चित्तजजनक! शौरे!
वित्तपुत्रकलत्रेहायत्तजनदुरवाप! पालय

(२) दन्तिराजतापहर! बन्धुरराजीवारुणाधर!
सिन्धुसुताकराम्बुजसन्ततलालितपाद! पालय

(३) देवमुनिगणामेयं तावकीनमहिमानं
जीवलोके को वा स्तोतुं केवलं निपुणायते पालय

श्रीपद्मनाभकेशादिपादवर्णनम्।

गानं—७९. मलहरि. झम्प.

प. कलये देवदेवमुरुकारुण्यनिवासं

अ. बलमथनमुखविबुधवन्द्यमानमनिशं कलये

च. (१) विमलमणियुतमकुटविलसिततरशिरसं
सुमवासितकेशभरं सोमबालभालं
कमलबाणचापसमकमनीयचिल्लियुगलं
रमणीयकुवलयदळराजिनिजनयनं कलये

---

१ 'कृपार्ण ना' क. पाठः.

च. (२) तिलकुसुमविजयपटुदिव्यतमनासिकं
कलितमकरकुण्डलकान्तिदीपितकपोलं
अलघुशोणवरबिम्बफलसुरुचिराधरं
विलसितकुन्दरदनं विशदमन्दहसितं कलये

(३) अरुणकौस्तुभमणिहारबन्धुरकण्ठ
पुरुकङ्कणलसितपृथुभुजयुगलशालिनं
वरदमतिरुचिरश्रीवत्सविराजितवक्षसं
हरिमखिलजगन्निलयोदरमाश्रितवत्सलं कलये

(४) चतुराननिलयायितचारुनाभिपुटमजित-
मतिपीतरुचिरवसनावृतघनोरुभागम्
अतिमञ्जुजङ्घायुगमलघुभववारिनिधि-
पतितमन्दरोद्धरणपरकूर्मपदाग्रं कलये

(५) उरगपरिवृढशयनमुन्निद्रतनुसुषमं
दररथाङ्गशार्ङ्गगदाद्यायुधसंसेवितं
धरणीरमाकान्तमघहरणचणचरित्रं
भरितकरिनायकं श्रीपद्मनाभमाद्यं कलये

गानं—८०. मध्यमावति. त्रिपुट.

प. श्रीपद्मनाभ! कलयितुं त्वां मम
चित्तं परमुत्कण्ठते

अ. तापसमनोमयतामरसनिवसन!
आपन्नाधिनिवहहरण! लोकनायक! श्री

च. (१) तरुणी विरहातुरा दयितं प्रोषितमिव
सरळभृङ्गमालिका सारसिनीमिव
परभृततितिरिव वरवासन्तिककालं
परम! पिपासुरिव पानीय सुमधुरं श्री

च. (२) चातकततिरिव जलदमनन्यपरा-
जातगरुतोऽण्डजा जननीमिव विवशा
आतपाकुलो यथा हन्तानातपदेशं
शीतकरं चकोरशिशुरिव दिनमनु श्री

(३) पुरुहेमन्तसमये पूरुष इवावरणं
वरद! भरितोदन्या वत्सा स्तन्यमिव च
जरया पीडितो यथा करतलालम्बदण्डं
सरसिजानन! देव! स्यानन्दूरेश! श्री

अनन्तशयनस्थलपुराणकीर्तनम्.

गानं—८१. मोहनं झम्प.

प. सेवे श्रीपद्मनाभमनिशं

अ. देववरमकुटमणिदीप्तिनीराजितपादं सेवे

च. (१) परमभागवतदिवाकरयतीन्द्रनयनगोचर-
बालरूपधरं सरसिजेक्षण
परिपूजनसालग्रामहरणकुपित-
संयमिकरवारितमदृश्यमथ परमकोमळहसितं सेवे

(२) तदनु शोकभरभरितदण्डिवरगवेषितं
मुदितं मत्स्यतीर्थाञ्चितमोहनोत्तमाङ्गं सदयं
शङ्खचक्रतीर्थसन्निहितनिजबाहुं
विदितधर्माधर्मतीर्थविन्यस्तपादपद्मं सेवे

(३) अतिमहितेदृशरूपाकलनसुबहुविस्मित-
मुनीन्द्रयाचनया भृतकरुणारसं
यतिवेणुदण्डत्रितयमानसङ्कुचितं
धृतिविलसद्द्वारत्रयपावनविमानाश्रितं[1] सेवे

---

1 'प्र' क. पाठः

च. (४) तरसा योगिकृतसपर्यं धरणीरमायुतममलं
गरुडकृतनुतिरसिकमुरगशयमीशं
परमपातकहरपद्मतीर्थादिवृतं
सरसमिह स्यानन्दूरजनतापुण्यनिकायं सेवे

(५) वरवञ्चिमार्ताण्डवर्ममहीवलमथन-[1]
परिकल्पितलक्षदीपादिपरमोत्सवमुदितं
चरणपङ्कजैकगतिसाधुलोकपोषणाय
करुणया धृतदीक्षं गळितावधिकालं सेवे

---

४. श्रीनृसिंहकीर्तनानि.

गानं—८२. बिलहरि. चेम्पट.

प. जय सुगुणालय! जय जय हरे! त्रिनयन!
जय श्रीनरसिंह! जय

अ. शशधरकोटिसदृशदीप्ते! दीनशरण्य! श्रीनरसिंह

च. (१) घनभक्तिनिकेतनकयाधूनन्दनवन्द्य! श्रीनरसिंह
(२) मघवद्बलेशालघुतराश्रयानघचारित! श्रीनरसिंह
(३) असदृशमहिमविलसितविमलमानसहर्म्य! श्रीनरसिंह
(४) अखिलमौलिसुरसुखदायककरनखजाल! श्रीनरसिंह
(५) अनवद्यतपोधनसनकसनन्दनवन्द्य! श्रीनरसिंह
(६) कनककशिपुविदलनचण! कारुण्यनिदान! श्रीनरसिंह
(७) विततकेसराहतजलद! महोन्नतरूप! श्रीनरसिंह
(८) प्रकटबलासुरनिकरातिभयानकरदन! श्रीनरसिंह
(९) दुरिततिमिरभास्कर! कोसलपुरनरनाथ! श्रीनरसिंह

गानं—८३. आरभि. अटन्त.

प. नरसिंह! मामव भगवन्! नित्यं

अ. हरविरिञ्चिवासवनुतशौर्यसिन्धो!
अतिरभसनिहतासुर! दीनबन्धो! नर

---

१ 'द्वीपालव' मुद्रितपाठः.

च. (१) कनककशिपुवनदाव!
बोधाकर! देव! महानुभाव!
सनकादिमुनिजनशरण! पवित्र!
जनितारिभयगात्र! सारसनेत्र! नर

(२) विततकेसराहतशरदजाल!
विश्वनायक! भक्तवरद!
अतिमात्रविनयप्रह्लादसामोद-
नतपादामलवेदततिगीताभेद! नर

(३) करधृतशितहेतिजात!
भूरिकलुषवारिदकुलवात!
भरितकृपारस! परिपालितेभ!
परममङ्गलशोभ! पङ्कजनाभ![1] नर

गानं—८४. मोहनम्. रूपकम्.

प. परिपाहि मां नृहरे!

अ सरसिजभवनुत! साधुलोकभयापह! परि

च. (१) शरणागताधिहरण! देवदेवेश! शतमन्युनत-
चरण! वरतापसहृदयवारिजातकलहंस! परि

(२) दनुजनिकरदमन! धन्यकयाधूतनयसङ्कटशमन!
जनितभुवनभीतिकनककशिपुकाल! परि

(३) शमलशलभदीप! भक्तवीक्षणशमितनिस्तुलकोप!
कमलदळनयन! कमलनाभ! सततं परि

(४. घ. श्रीकृष्णकीर्तनानि।)

गानं—८५. बिलहरि. चेम्पट.[2]

प. स्मर सदा मानस! बालगोपालं

---

१. 'त' क. पाठः २. 'आदिः' क. ख. पाठः.

अ. दुरितमयदारुणगिरिकुलिशं

च. (१) यदुकुलतिलकं यमिजनविनुतं
परमगुणवसतिं वारिधिशयनं स्मर

(२) सरसिजनयनं सामजवरदं
मदनजनकमिह मधुसुरदलनं स्मर

(३) गरुडतुरङ्गं कनकसुचेलं
परमपूरुष श्रीपङ्कजनाभं स्मर

गानं—८६. श्रीरागम्. झम्प.

प. भावयामि नन्दकुमारं

अ. भावुकदाननिपुणपादसरोरुहमखिल-
देवमुनिजनविनुतदिव्यसुगुणनिवासं भावयामि

च. (१) मुरलीगानरसिकमतिनीलं
व्रजवनितामोहकमाहतशिशुपालं
तरणिकोटिमदशमनवरकिरीटधरमखिल-
शरणमात्मवदने[2]चारिमविजितसोमं भावयामि

(२) विमलसूनगणसुरभिकेशं
परमदयाविधुतनिजजनभवपाशं
यमुनाकेलिपरममलयादवकुलभूषणं
कमलबाणजनकमतिकान्तं पीतरुचिबसनं भावयामि

(३) अधरजितबिम्बफलशोभं
गलविधृतहारमिह श्रीपद्मनाभं
मधुकैटभमुखदनुजमर्दनचतुरम्
अनघमधरीकृतमौक्तिकहासमुरुभासं भावयामि

गानं—८७. कल्याणी. झम्पट.

प. जय जगदीश! नन्दकिशोर!

---

१. 'त' मुद्रितपाठ.. २. 'नवरचा' क. पाठः. ३. 'आदिः ।' क. ख. पाठः.

अ. नयनविनिन्दितनलिन! जगत्त्रय-
भयविनिवारणशुभचरित! — जय

च. (१) अहिवरकालियफणकृतनर्तन!
हतशकटासुर! विधुवदन! — जय

(२) व्रजवनिताजनहृदयहर! मधुर-
वचनरचन! मुनिजनसेव्य! — जय

(३) मणिमयभूषणमण्डित! सुरनर-
मान्यचरित! सारसनाभ! — जय

गानं — ८८. यदुकुलकाम्भोदरी. अटन्त.

प. मोहनमयि! तव मुरळीगानमहो
मोदयति नो कमिह भुवने

अ. देहविजितमार! दिव्यमानुषवेष! — मोहन

च. (१) नीरसोऽपि विटपी निशमनेन
तरसा चारुकिसलयितो जायते नव इव
सारङ्गततिरपि शान्तोलपकबळा
नीरजाक्ष! भवति निभृतचित्रगतेव — मोहन

(२) मत्तवारणवरमस्तकभेदने
दत्तमतिरपीश! तरसा किल केसरी
चित्तगतमोहेन चिरविस्मृतभावोऽथ
सत्तम! निवसति साधुवृत तत्रैव — मोहन

(३) परमपुरुष! जडपाषाणनिकरोऽपि
परितो द्रवति हन्त परिकर्णनेन
तरुणीजनमोहकं तदिह समजनीति
परमद्य किमु चित्रं पद्मनाभ! मुरारे! — मोहन

---

१. 'त्रिपुट', २. 'सानुमति नि' क ख पाठ ३. 'व', ४ 'द्रवा', ५. 'सामजभीतिहर' मुद्रितपाठः

गानं — ८९. नीलाम्बरी. चेम्पट.

प. कळकण्ठि ! कथङ्कारं सखि ! विस्मरामि
कपटनाटकसूत्रधारं

अ. अळिकशोभितचारुहरिचन्दनतिलक कळ

च (१) सरसश्रीपादमूलं पीयूषवाणि ! सरसगुणालवालं
चारुमुकुरकपोलं सङ्क्वणितवेणुनाळं
गौररुचिरचेलं गळधृतवनमालं कळ

(२) दन्तजितकुन्दजाल विद्युल्लताङ्गि ! दान्तजनतानुकूलं
शान्तनवसमयपालं शमिताखिलरिपुजालं
कान्तेन्द्रनीलनील कालिन्दीकेळिलोलं कळ

(३) वृन्दावनकृतलीलं पूर्णेन्दुमुखि ! विश्वजनावनशीलं
सन्दळितशिशुपालं सततावृतगोपालं
नन्दिततरकुचेलं नन्दकमनीयबालं कळ

गानं -- ९०. ललितपञ्चमं. झम्प.

प. परमपुरुषं हृदय ! भावय तं

अ. मुरलीनादविवृततरपरललितपञ्चमं परम

च. (१) देवकीवसुदेवातिदिव्यपुण्यनिचयमम[1]-
रावननिरतमजितमम्बुदाकृतिं
पावनतरणितनयोपान्तविरचितलीलं
सेवकाभीष्टदायकं सितदशनभासुरं परम

(२) गोपवनिताहृदयतापहरमतिमधुरा-
लापमवनीभारभूपमर्दनं
श्रीपतिममलयोगिचिन्त्यपदयुगळमखि-
लापदुद्धरणपटुमब्जभववन्दितं परम

(३) समरजितदानवं सकललोकनतमखिल
शमलहतिचणसरसचरितमक्षयं

---

1. 'दि' क. ख. पाठः

कमलदळनिभनयनं कलितकरुणारसं
कमलनाभममितभवगदशमनैकारणं   परमं

गानं — ९१. कन्नट चाप्पु.

प. कलयामि हृदि नन्दकमनीयबालं

अ. जलजासनविनतचरणवारिरुहैमाद्यं कलयामि

च (१) यामुनपुलिनविहारिणं व्रज-
यौवतसम्मदकारिणं
कोमळवनदामधारिणं बहु-
गोपवृन्दवृतमम्बुरुहाक्षं कलयामि

(२) देवमौलिपरितोषणं वर-
देहपॅरिलसितभूषणं
भावहर्षिमृदुभाषणं रिपु-
दावदवमतिमेचकँभासं कलयामि

(३) सोमवंशदिव्यमण्डनं विधु-
सुमुखमखिलपापखण्डनं
भौमदानवचण्डदण्डनं श्री-
पद्मनाभममलाशयैसेव्यं कलयामि

गानं—९२. नवरसम्. अटन्त.

प. सेवे नन्दनन्दनं सततं

अ. पावनयमुनातटावासं सुरहरं सेवे

च. (१) शीतकरसन्निभवदनं विधि-
चित्तजजनकं कुन्दकुड्मळरदनं
वीतमोहहृदयसदनं परिवीत-
पीतवसनं हृतसुरकदनं सेवे

---

१. 'न भासुर प', २ 'मि न'; ३. 'हृ कल' क ख. पाठः. ४. 'विलं', ५. 'कं कल', ६ 'भ', ७. 'यं पल' क, पाठः. ८. 'त्रिपुट' क. ख. पाठः.

च. (२) दूरितसेवकैकदनं विधु-
द्युमणिकलितनेत्रं पदजितकमलं
घोरदैत्यदहनममलं नील-
कुटिलकुन्तळराजिमुखमतिविमलं सेवे

(३) नीरदसमरुचिकरणं धरणी-
भरतिमिरसमूहतिग्मकिरणं
नारदादिमुनीन्द्रशरणं पद्म-
नाभमखिललोकतापपरिहरणं सेवे

गानं—९३. भैरवी. चेम्पट.[२]

प. पालय देवदेव! गोपाल! रामसोदरयुत!

अ. शैलारिसुताभयद! सत्यभामासहित! मां पालय

च. (१) पवनजसन्नतनिजपादाङ्करहित! गुण-
भवन! कौशिकाद्दतानुभाव!
भुवनपालनैकलोल! पूरितभीष्मसमय!
विविधभक्तजनतापविदळनोद्भवसंयुत! पालय

(२) पूतनामारण! श्रुतिबोधाकर! हरिवंश-
जात! पालितविबुधजात!
सातकर! यशोदयासाधुसमलङ्कृत! सनातन!
धृतकलाप! नागारिभासिगमन! पालय

(३) वारिधिमदभञ्जनवरदेहच्छवे! रिपु-
वारणकलितवनवास!
सारङ्गसद्गतिप्रद! सर्वलोकशुभकर!
शूरजातपर! स्मरसुन्दर! श्रीपद्मनाभ! पालय

---

१. 'ककद्मल वि' मुद्रितपाठः. २ 'आदिः', ३. 'ति' क. ख. पाठः. ४. 'सद्भव' क. ख. पाठः. ५. 'सू' मुद्रितपाठ..

गानं — ९४. कामोदरी. चेम्पट.

प. रासविलासलोलो लसते भवान् देव!

अ. भासुरकाळिन्दीपरिसरे मधुवने रास

च. (१) केशभारनिबद्धकेकिबर्हो निकामं
पेशलमणिभूषपीतवसनशाली
नाशयन्निह कुसुमाशुगमदं[1] तनुकान्त्या
केशव! मृदुविलसद्वदनो मुनिगेयकीर्ति-
रमलमूर्तिरतिपावनो जगति रास

(२) मदनातुरगोपिकामण्डलमध्यगतो
मुदमनुपमं तासां मुरळीरवेण दिशन्
तदतुलगानमुदितलोलमौलिरिह
पदयुगविलसन्नवमणिनूपुरभव्यनाद-
विजितहंसनिनदो रमारमण! रास

(३) विविधनर्मालापनवीटीदानचुम्बन-
प्रविततभुजाश्लेषादिविलासशतैरहो
विवशयन्नमुं यदुवीर! गोपीसञ्चयं
दिवि समुपागतनिर्जरसन्नुत! दिव्यशोभ!
जलजनाभ! शरणागताधिहर! रास

गानं—९५. मोहनं. चेम्पट.

प. मोहनं तव वपुरयि मुरहर!
मामके हृदि विलसतु समधिक-
मोदकारणमम्बुजनाभ! विभो!

अ. देहराजितवरहरिचन्दन!
भूरमावदनाम्बुजमधुकर!
वाहिनीशगभीर! सुरान्तक!
सेवकाखिलशोकनिवारण! मोहनं

---

१. 'दं का' मुद्रितपाठः. २. 'वदनाम्बुजसे' मुद्रितपाठः प. पाठश्च.

च. (१) पावनसुचरित! पङ्कजसुनयन!
श्रीविजितमदन! शीतकरवदन!
देव! मधुकैटभघनवनदाव! पटु[1]कालियमर्दन!
देवदनुजविद्याधरसंसेवित!
दीनजननिकरकल्पकभूरुह! मोहनं

(२) गोपनिवहयुन! कोमळतमहस!
कोपहतशकटघोरदितिज!
धुतपाप! हृतसर्वचराचरताप! बलदेवसहोदर
भूपति[2]लकधर्मात्मजसुखकर!
भूमीविहितभरनाशन! यदुवर! मोहनं

(३) नीलसुषम! भुवनेश! करविधृतशैल!
निहतशिशुपाल! कनकनिभचेल!
घनसारतिलकितनिटिल! मधुरालपनामल!
कालविमतदेवाधिपसन्नुत!
कामजनक! कलिदोषहरणपर! मोहनं

गानं—९६ अठाण. रूपकम्.

प. सारसायतलोचन! पाल्य मामभरविटपिवर-
चारुकिसलयसुलळितपदयुगळ!

अ. मारकोटिमनोहर! गिरिधर!
मारमण! सुरनायकसोदर! सारसा

च. (१) पादनखहिमकररुचिविद[3]लित-
भवनिरुपमतमघनगदतिमिर!
वेदान्तागमवेद्य! मुरान्तक!
वेणुरवरसिकातिमनोहर! सारसा

(२) पीतरुचिविमलवसन! यदुवर!
बिम्बफलमदहृतिपरिलसदधर!

---

१. 'रसे', २. 'म'. मुद्रितपाठो घ. पाटश्च. ३. 'निवह! वे' मुद्रितपाठः.

पाताशेषजनामलतरगुण!
भानुशशधरलोचन! मोहन! सारसा

च. (३) नन्दकृतसुचरितकुल! जलरुह-
नाभ! कुरु मम गदहृतिमयि भगवन्!
कुन्दकुड्मलभासुरवररद!
गोपतनुधर[1]! कालियमर्दन! सारसा

गानं—९७. बिलहरी. रूपकम्.

प. गोपालं सेवेऽहं

अ. पापनिकरनाशनं गोपालं सेवेऽहम्

च. (१) लोकेशं विकसितशरदिजजलरुहसमरुचिलोचनं
नाकेशनुतमङ्घ्रिनतजनभवभयहरमिह गोपा

(२) कालिन्दीतटकृतविहरणमतिमृदुहससुरुकामदं
कालियमदहरं कमलजनतपदमयि गोपा

(३) धीरं[2] तं सुमविशिखसदृशनिजतनुनिरुपमदीधितिं
सारसनाभमतिसरभसदितिसुतहरमनन्तं[3] गोपा

श्रीकृष्णावतारकीर्तनम्।

गानं—९८. कुरिञ्चि[4]. झम्प.

नन्दसुत! तव जननमिन्दुकुले जगदीश!
नन्दयति जगदखिलमिन्दिराधरेश! नन्द १

मन्दमन्दमनुगर्जति[5] मांसलघने[6]ऽपि देवा-
नन्दरूप! परमहंसनत! महानुभाव! नन्द २

महिताष्टमीरोहिणीसहितदिवसनिशीथे
विहितनिद्रे[7] खलकंसप्रहितभटयूथे नन्द ३

---

१. 'धनुर्धर', २. 'शं', ३. 'मनु गो' मुद्रितपाठः. ४ 'नवरस झ' क. ख. पाठः. ५. 'च्छ' मुद्रितपाठः. ६. 'नो', ७. 'द्राविले।क' क. ख. पाठः.

विमलशीतसलिलासु विलसन्तीषु तटिनीषु
कुसुदामोदवति वायौ भ्रमति दिगन्तेषु — नन्द ४

देवनिकरे वियति दिव्यसूनमभिवर्षति
पावनतापसजाले[1] परमनुहृष्यति — नन्द ५

देवकीसहितवसुदेवे नीरधरशोभ !
केवलं संस्तुवति मुदा केशवाब्जनाभ ! — नन्द ६

गानं—९९. देवगान्धारं. झम्प.

प. जय जय रमारमण ! जागृहि विभो !

अ. देव ! नभोमणिरिह दीधितिगणैरिदानी-
मेव नाशयति निबिडतिमिरजालं
तावकपादाम्बुरुहदर्शनमखिलजन-
भवतापसमुदयं विदळयति यथा — जय जय

च. (१) मधुरवेणुरवसुधया मदनजनक ! तरसा
विधुरतामपोह्य नो विश्वबन्धो !
मधुमुरादिदनुजकुलनिधनतोषितसमवि-
बुधनिवह ! वसुदेवसुकृतराशे ! — जय जय

(२) तरुणगोपवधूकलितदधिमथनसमये
कराभरणमृदुशिञ्जितं मुखरयति घोषं
मरकतरुचिरशकलमदहरणपरमप्रह्व-
तरशरीरनवसुषम ! यदुवतंस ! — जय जय

(३) मीनकूर्ममहितकिटिवरनरहरिवामना-
न्यूनभृगुसुतरामरामराम !
भानुसुताप्रिय ! मुकुन्द ! भाविकल्किवररूप !
दीनपालनपर ! श्रीपद्मनाभ ! — जय जय

१, 'क्ले ननु', २. 'त' क. ख. पाठः.

भागवतसारकीर्तनम् ।

गानं—१००. पुन्नागवराळी. झम्प.

प. भावये श्रीगोपालं
भवविनुतभव्यसुगुणालवालम्

अ. देवराजमुखविबुधसेव्यपादपङ्कजं
दितितनूजघनविपिनदावं देवं भावये

च. (१) विदितयदुवंशप्रदीपं
वसुदेववेशितयशोदासमीपं
पूतनाविदळनविधुतसुजनतापं
गर्गमुनिविहितमधुरनामालापं
गोपिकासदनकृतनवनीतलोपं
मातृनिजवदनदर्शितभुवनरूपं
श्रीकृष्णं सदयहृतधनदसुतशापं सुकलापं
सङ्गतयमुनाविमलापं गोपं भावये

(२) परमघातुकाघकालं वत्सहृति-
परिचकितविधिविनुतलीलं
पदमृदिततरकाळियविनतपादमूलं
काळिन्दीतटहृतपशुपवधूचेलं
मृदुलतरकरधृतगोवर्धनशैलम्
आभीरकमनीरासकेळिलोलं
श्रीकृष्णं परमहंसहृदयाब्जखेलं शुभशीलं
पाटितवृषादिरिपुजालं नीलं भावये

(३)[1] दनुतनयकेशिकृतान्तं
गान्दिनीतनुजोदितकंसस्वान्तं
सङ्गतजननिबिडमथुरोपान्तं
सैरन्ध्रीतनुसुभगीकरकरान्तं

---

१. 'नीयरा' क ख पा.

सरभसमनुजकुलमिळितकंसान्तं
सान्दीपनिमुनिविदितशास्त्रकृतान्तं
श्रीकृष्णं विनतोद्धवलसितसभान्तं
भूकान्तं वीरजरासुतजयभान्तं शान्तं — भावये

च. (४) कलितद्वारकापुरनिवेशं
भीष्मपुत्रिकाद्यष्टवधूजीवेशं
निजविरहाकुलगोपवधूशोकनाशं
विरचितकुन्तीसुतज्ञानोपदेशं
दारिद्र्याविलकुचेलदत्तधनकोशं
मृततनयकुलदानपूरितद्विजाशं
श्रीकृष्णं बलदेवानुजमसितकेशं
लोकेशं पद्मनाभमम्बुदनिकाशं श्रीशं — भावये

(४. ङ. श्रीरामकीर्तनानि ।)

गानं—१०१. वेगट. अटन्त.

प. कलयामि रघुरामं भूपललामं
अ. नीलोत्पलसन्निभगात्रं परमपवित्रं — कलयामि

च. (१) धनदानुजघनवनदहनं तप्त-
कनकनिभवसनं वनजाक्षं
सनकादिमुनिविनुतशुभचरितं
मनसिजरूपम् अनवद्यम् — कलयामि

(२) करुणावारिनिधिं चरणनळिनपूत-
वरतापसमहिळं सुरपालं
कुरुविन्दनिभरदं परमपुरुषमिह
धरणिनन्दिनीकेलिपरमीशं — कलयामि

---

१ 'नु' क. ख पाठः २. 'त्रिपुट'. ३ 'भूतलल' क. पाठ..

च. (३) द्युमणिकुलतिलकं विमलगुणं सर्व-
शमलहरणचणं रमणीयं
कुमुदैकबान्धवसमवदनं श्री-
कमलनाभं घनशोभं कलयामि

गानं—१०२. भूपाळं. रूपकम्.

प. राम! राम! पाहि राम!

अ. कामकामनीयकाङ्ग! हेमाम्बर! शुखविहसित-
सोम! सोमाविनुत! नृपललाम! महितकान्तिसीम! राम

च. (१) सेवकजनसमवरद! सीतावर! सुखकरद-
रावलोक! घनशरदरम्यकेश! वरद!
भूवलयाधिप! करदभूप! गमजितद्विरद!
भावसकलगदहरदयाविलास! रुचिररद! राम

(२) काननविरचितचरण! कञ्जताम्रतरचरण!
सूनहारशुभकरण! सूर्यकुलाभरण!
दानवकुलमदहरण! दीनदीनजनशरण!
मौनिकल्पितस्मरण! माननीयमहितरण! राम

(३) पालितकौशिकसवन! पद्मनाभ! मरुद्वन!
शैलवैरिकृतनवन! शान्तसागरवन!
नीलगात्र! गुणभवन! नीतिहीनघनपवन!
सालभेदकृतजवन! सरोजाक्ष! भृतभुवन! राम

गानं—१०३. मध्यमावती. झम्पट.

प. कोसलेन्द्र! मामवामितगुणनिवास! भगवन्!

अ. भासमानमहामणिमण्डपपरिविलसितसिंहासन-
[राजित! कोस

१. 'त । नीसरिसरिमा।रिमपानिपमापससनिपरिपनीपामरिमरिस । नीरजशर-
भासमपावनमापरिलसित! कृपानिकामभृतरस!। कोस' क. ख. पाठ..

च. (१) बाहुधृतशरचाप! धुतभक्तजनाखिलताप!
आहवाहतविमताटोप! हारमकुटकेयूरकलाप! कोस

(२) जानकीलसिताङ्क! जलजाक्ष! विनाशितलङ्क!
भानुवंशपयोधिशशाङ्क! पादविहतमुनितरुणी-
[पङ्क! कोस

(३) नीलजलधरगात्र! धृतनीलनलारुणपुत्र!
भाललोचनमुखनुतिपात्र! पवनसुतकलितचारु-
[चरित्र! कोस

गानं—१०४. शहान. अटन्त.

प. जय जय रघुराम! निहतनिशाचर! सत्यकाम!

अ. नयनजितकमल! नामदूरितमल! मयि दयां कुरु
महिततरमणिमयविभूषण! मनुकुलोत्तम! जय जय

च. (१) दिनकरतनयपाल! सेवकपवनज! हाटकचेल!
घनसाराङ्कितभाल! कौसलेय! सुशील!
जनितनतजनसकलशुभगुण!
सनकमुखमुनिशरण! निरुपम! जय जय

(२) वारिधिमदविदार! पूर्णचन्द्रवदन! विमलहार!
मारसमाकार! महीधरातिगम्भीर!
सारसोद्भवसन्नुताहव!
चारुतरहास! जानकीवर! जय जय

(३) साकेतपुरभूप! पङ्कजनाभ! समरदर्शितकोप!
नाकनायकतापनाशनाद्भुतरूप!
श्रीकराखिलसेव्य! मम पर-
माकलय शुभमाशु दिनमनु जय जय

---

१. 'भङ्ग।', २. 'ल्ये' मुद्रितपाठः.

गानं—१०५. भैरवी. आदिताळः.

प. रघुकुलतिलकमयि भजानिशमिह रामचन्द्रममलम्

अ. अघहरणचतुरचरणयुगलम्
अमलममितगुणं लोकनिकरशरणं रघु

च. (१) रामं निजतनुरुचिविहसितकामं परिपूरितनतजनकामं
मुखनिन्दितपार्वणसोमं सुललामं भृगु-
रामगर्वहारिणमुरुमौक्तिकदामलसितमरिसमुदयभीमं रघु

(२) नीलं कनकरुचिमदहरणचेलं परिजनपवनजनळनीलम्
असिताळकपरिवृतभालं सुकपोलं सुर-
जालखेदनाशनपटुतममतिवेलविवशजनसमुदयपालं रघु

(३) भूपं करतलविलसितशरचापं घनसङ्गरदर्शितकोपं
सनकादिहृदालयदीपं धुतपापं कम-
लाभमञ्जनाभमकृतसुकृतदुरापम् ईक्षणहृताश्रिततापं रघु

गानं—१०६. भैरवी. चेम्पट.

प. रामराम! गुणकुसुमाराम! राम-
णीयकाभिराम्! रामराम

अ. दीनपालन! निर्जितपरशुराम! रमाबिम्बोकालय! रामराम

च. (१) राजराजवन्द्यचरणाम्भोज! भो ज-
गत्रयाधार! राजराजमान्येषुचाप!
विक्रमभासुराजराजसन्तानदीप! रामराम

(२) तारतारासुतकृतोपचार! चार-
विदितलोकाचार! चारणसेवित!
विदळितभूभार! भारतीशभावित! रामराम

(३) कालकालादृत! सीतामहेलाहेला-
श्रय! विशिखवातूलतूलायितदूषण!
सुजनविहारसालसाल! विगतदूषण! रामराम

---

१. 'गम्' क. पाठ.. २. 'सकलाभ', ३ 'णाभिसे' क. ख. पाठ..

च. (४) लोकालोकातीतगुणविपाक! पाका-
हितपूजित! लोकालोकमुनिमानित!
परिहृतभवशोकाशोकवनहृतसीत! रामराम

(५) भानुभानुसमतेजोभुजानुजानु-
कूल! प्लवगानुगानुसृतसुग्रीव!
कौसल्यानन्दनानूनानुपमवैभव! रामराम

(६) भावभावालय! महानुभाव! भाव-
यामि वैरिदावदाव! लोकनायक!
घनगम्भीररावरावणसंहारक! रामराम

(७) सारसारणादिकसंहार! हार-
शोभित! सनीरनीरदसदृशाभ!
भूषारत्नांशुशारशार! श्रीपद्मनाभ! रामराम

गानं—१०७ देवगान्धारी. रूपकम्.

प. रामराम! पाहि वारिवाहश्याम!

अ. भूमिभरकदनहर! हे बोधाकर! राघव! रामराम

च. (१) मदनविमतवरकार्मुकविदलनविश्रुतभूरिदभार्गव-
गर्वशमन! सदयानन्दितलोक! रामराम

(२) कनकहरिणरूपसमागतमारीचविभञ्जन! दयिता-
हररावणघनवातानुपमेय! रामराम

(३) सूर्यतनयपवनात्मजशोभितपार्श्व! जगन्नुत-
वीर्यनिलय! पद्मनाभ! वेदवेद्य! सततं रामराम

गानं—१०८. सारङ्गम्. त्रिपुट.

प. पालय रघुनायक! वैरिमण्डलपाटनपटुसायक!

अ. भालनयनसेव्य! पङ्कजातवदन! नीलवारिददेह!

[नित्यानन्द! हाटक-

---

१. 'नुश्रित' मुद्रितपाठः. २. 'पूजितभा' क. ख. पाठः.

चेल! वरगुणजाल! नवमणिमाल! सुहृदनुकूल! निरु-
पम! पालय

च. (१) वीरकपिपरिवार! सङ्गराङ्कणविजितरावण! गम्भीर-
वारणेन्द्रगमन! वारिताम्बुधिगर्व!
मारसदृशाकार! मान्यमुनितोषण!
घोरभुजबलदारितपरम-
धीरमघवकुमार! मृदुहस! पालय

(२) भीमकार्मुकविभङ्ग! निस्तुलबाणभिन्नकनकसारङ्ग!
कामदायक! सीताकान्त! जगन्नुत!
रामणीयकावास! रात्रिञ्चरभीषण!
राम! भूपतिललाम! जितभृगु-
राम! रविकुलसोम! पटुतम! पालय

(३) कुन्दसमरदशोभ! नेत्रजितारविन्द! पङ्कजनाभ!
सिन्दूरारुणाधर! श्रीसाकेतनिलय!
मन्दारतरुवरनिन्दकवितरण!
इन्दुमुख! सुरवृन्दपरिणुत!
चन्दनरचितसुन्दरतिलक! पालय

गानं — १०९. भैरवी. चेम्पट.

प. वसुन्धरातनयाधव! पालय
वासवादिनतपाद! कृपालय!

अ. वसानिशं मम हृदि जगदीश्वर!
वैरिजालहरचापविशिखधर! वसु

च. (१) हेमचारुरुचिमदहरनिरुपमचेल!
हितसज्जनसमुदयपाल!
दशकण्ठविनाशन! कामकोटिसुन्दर! पदनतजन-
कामदायककटाक्षनिरीक्षण!
हिमकरसमरुचिवदनपरिलसित! वसु

च. (२) वीरकीशगणपरिवृत! दुरितनिरास!
विदितामलगुण! मृदुहास!
मनुवंशविभूषण! पारिजातसुमवासितकचभर!
शारदाम्बुरुहनेत्रयुगामल!
दिनकरसुतभयहर! हरपरिणुत! वसु

(३) नीलकान्तिघनविजयचणाद्भुतदेह!
नृवराहिसमालघुबाह!
जितभार्गव! मोहनभाललालसितसुन्दरमृगमद!
पद्मनाभ! पुरुषोत्तम! जय जय!
कुरु मम शुभमयि दिनमनु रघुवर! वसु

गानं — ११०. तोटी. आदितालः.

प. श्रीरामचन्द्र! दिश मम शुभमतिमयि कारुण्यसान्द्र!

अ. नाराचचापशोभिनिजकर!
धीरोदारसुगुणनिवसन!
सारामेय! विनतसुरगण! श्रीराम

च. (१) राम! घननिशिचरनिकरविराम!
निजमुखरुचिविहसितसोम!
नरवरकुलमहितललाम!
रविवंशविभूषण! सामजाधिपसमानयान! वर!
जानकीरमण! मौनिजनावन! श्रीराम

(२) नीलनळपवनजमुखकपिजाल-
परिवृत! शुभतमनिजलील!
वितरणहृतमदसुरसाल!
कनकोपमिताम्बर! कालकालवरचापविभञ्जन!
कम्बुकण्ठ! मणिहारविराजित! श्रीराम

(३) केशजितजलधर! समभुवनेश!
पदसरसिजविनतसुरेश!
हतनतजनघनभवपाश!

अप्रतिमामितविक्रमनाशिताखिलमलाजित! पङ्कज-
नाभ! चारुसरसीरुहलोचन! श्रीराम

गानं—१११. केदारगौळं. चेम्पट.

प. राम! परिपालय माम् अयि भीमनिशिचरविदलन!
जगदीश!

अ. कामाधिकसुन्दर! नतजनकामितवितरणलोलुप! राम!

च. (१) वायुसूनुकरलाळितपदयुग! वारिजातरुचिहारि-
[वदन! निर-
पाय! हेममृगखण्डन! सुलळितभालशोभि-
घनसारतिलकवर! राम!

(२) वारिराशिमदनाशनपटुशर! वासवाश्मकमनीयसुषम!
चारुरत्नयुतहेममकुटधर! जानकीहृदयमोहन!
[मृदुहस! राम!

(३) साधुजालसकलाधिहरणचण! सार्वभौम! सुर-
मौनिविनुतगुण!
बाधिताखिलमलाम्बुजसुनयन! पद्मनाभ! सम-
मङ्गळवितरण! राम

गानं—११२. धनाशि (धन्यासि) रूपकम्.

प. कलयामि श्रीरामं

अ. खलदानवनाशनं कार्मुकशरधरं
वलभिदुपलनीलं वारिजातनयनं कलयामि

च. (१) शरणागतभरणं जनकसुताजानिममितकरुणं
हरिवीरावृतोपान्तमम्बुधिमदहर-
मरुणबिम्बविराजदधरं जनेशं
दारितदारुणरावणमतिमृदुतरहसमहमिह कलयामि

(२) कमनीयतररूपं जलधिसमगाम्भीर्यमुरुप्रतापं
विमलयोगिमानसविहितनिजवसति-

ममरनिकरतापशमनपरायणं
सामजपुङ्गवचारिमहृतिचणनिजगतिमहमिह कलयामि
च. (३) नतभवगदहारिणं सरसीरुहनाभममलहारिणं
शतमन्युमुखनुतसङ्गरमनुजसंयुत-
मात्मनिरीक्षणहृतपापसमुदायम्
आतुरसाधुजनावनपटुतमगुणगणमहमिह कलयामि

गानं—११३. मध्यमावति. झम्प.

प. ध्यायामि श्रीरघुराममनिशं लोकाभिरामं
अ. तोयरुहदळायतामेयकृपाभृतनयनं ध्यायामि
च. (१) जनकसुताकलितवामभागं वरसुमित्रा-
तनयनुतं हतभवरोगं
निशिचरदळनचतुरभुजजिताहिभोगं
मृदुलधीरलसितयानहसितमत्तनागं
मुदिततरजनकवाक्यपरिपालं साकेतपुरमहीपं
मनुजरूपधरममलं मनुवंशतिलकमिह ध्यायामि
(२) करकलितविनुतभवमूलं वरमणिनि-
करशोभिताननकलापं
भरतपरिवीजितचामरकलापं पवनसुत-
करलाळितपादममृतालापं श्रीकोसल-
पुरनिलयनिखिलजनपूर्णानन्दकरमिन्द्रादि-
सुरवर्षितकुसुमचयमरुणकोटिसमदीधितिं ध्यायामि
(३) यमिवरवसिष्ठादिविनुतं कुमुद-
शरभादिकपियूथपरिवृतं
निशिचराग्र्यतमविभीषणभूरिविनुतं
धर्मानपेतमतिमतिधीरमविरतं
सुजनकुलविमतदशमुखमर्दनं वीरलक्ष्मीविलासं
समरभीमतरमिह श्रीसारसनाभममलं ध्यायामि

---

१. 'तादिप' मुद्रितपाठः. २. 'दम्भीवरवि' क. पाठः.

रामायणकीर्तनम् १.

गानं—११४. सावेरी. चेम्पट.

प. भावयामि रघुरामं भव्यसुगुणारामं

अ. भावुकवितरणपरापाङ्ग[1]लीलालसितं भावयामि

बालकाण्डम्.

च. (१) दिनकरान्वयतिलकं दिव्यगाधिसुतसवना-
वनरचितसुबाहुमुखवधमहल्यापावनम्
अनघमीशचापभङ्गं जनकसुताप्राणेशं
घनकुपितभृगुरामगर्वहरमितसाकेतं भावयामि

अयोध्याकाण्डम्.

(२) विहताभिषेकमथ विपिनगतमार्यवा[2]चा
सहितसीतासौमित्रिं शान्ततमशीलं
गुहनिलयगतं चित्रकूटागतभरतदत्त-
महितरत्नमयपादुकं मदनसुन्दराङ्गं भावयामि

आरण्यकाण्डम्.

(३) विततदण्डकारण्यगतविराधदलनं
सुचरितघटजदत्तानुपमितवैष्णवास्त्रं
पतगवरजटायुनुतं पञ्चवटीविहितावासम्
अतिघोरशूर्पणखावचनागतखरादिहरं भावयामि

किष्किन्धाकाण्डम्.

(४) कनकमृगरूपधरखलमारीचहरमिह सु-
जनविमतदशास्यहृतजनकजान्वेषणम्
अनघं पम्पातीरसङ्गताञ्जनेयनभोमणि-
तनुजसख्यकरं बालितनुदळनमीशं भावयामि

---

१. 'ङ्गलाल', २. 'ल' क. पाठ..

सुन्दरकाण्डम्.

च. (५) वानरोत्तमसहितवायुसूनुकरार्पित-
भानुशतभास्वरभव्यरत्नाङ्गुलीयं
तेन पुनरानीतान्यूनचूडामणिदर्शनं
श्रीनिधिमुदधितीरे श्रितविभीषणमिळितं भावयामि

युद्धकाण्डम्.

(६) कलितवरसेतुबन्धं खलनिस्सीमपिशिताशन-
दलनमुरुदशकण्ठविदारणमतिधीरं
ज्वलनपूतजनकसुतासहितं यातसाकेतं
विलसितपट्टाभिषेकं विश्वपालं पद्मनाभं भावयामि

रामायणकीर्तनम् २.

गानं — ११५. कल्याणी. अटन्त.

प. योजय पदनलिनेन मे मतिं विभो! जय
रघुवीर!

अ. श्रीजितमनसिज! मथितसुबाहो!
श्रितदत्ताभयदक्षिणबाहो! योजय

च. (१) महिळाललामश्रीकौसल्याकलितमरकततुलाकोटि-
मधुपकुलेन
महनीयदशरथमहाराजोत्सङ्गमण्डनोचित-
बाल्यकेलिकेन
बहलरागोज्ज्वलविद्रुमविजयप्रवीणमृदुलाङ्गुलि-
दलविलसितेन
बहुमहिमोन्नतिसंसूचनपटुबन्धुरारि-
दराङ्कुशाङ्कित(पाणि [१])तलेन योजय

(२) सवनसंत्वरमाणकौशिकतापससहगमन-
पुनरुक्तरक्तभरेण

---

१. 'रा' मुद्रितपाठः.

हवविधिविनिहतिचतुरमारीचनीचाहवोचित-
लाघवप्रणयेन
पविधारखण्डितचरितगौतमापातपातकौ-
घतमोनिवहमिहिरेण
भवकार्मुकलतिकारोपणकेलिभासुराङ्गुष्ठा-
नमितवसुधेन योजय

च. (३) परिणयसमयविदेहमहीपतिपाणिपुटपरि-
सृतजलधौतेन
परिसरगतनतवदनवैदेहीदृक्पद्मदलकलि-
तार्चनोज्ज्वलितेन
परुषितभृगुसुतमुनिवृषभाभिमुखपतनकला-
निकृन्तशक्तिधरेण
परिजनमेदुरकोसलपुरपरिपावनोप-
लसत्पलाशभरेण योजय

(४) जनकवाक्यगौरवसेवितजनस्थानजनितगिरि-
तरुवीरुदुटजतटेन
जनकनृपालसुताहृदयङ्गमजातरूपकुरङ्गकानु-
गतेन
घनतरदुन्दुभिकरङ्कविक्षेपणघटिततरणि-
तनूजविश्वसितेन
घनभूरिबलबालिदलनायोद्भिन्नघनतलद्रुम-
मूलतलनिहितेन योजय

(५) शरणागतनतसाधुविभीषणशाश्वतिक-
सम्पत्प्रदानपरेण
परमभागवतप्रभञ्जननन्दनपाणिपल्लवयुगल-
परिमृदितेन
शरपतनचकितवरुणोपदीकृतशातनवमणि-
दीधितिस्नपितेन
सरभसकपिभटघटितसेतुवरसाधितोरु-
सुवेलगिरिकटकेन योजय

च. (६) परिपाटितरावणकण्ठाटवीपातिशोणित-
पङ्ककलङ्कितेन
परिचरणविरहदूनसीताकरपरमसुखसं-
घटनपटिमवहेन
भरतप्रत्यर्पितमणिमयपादुकभासमानमयूख-
मयकवचेन
चिरविरहातुरसाकेतजनतप्तचित्तशल्य-
समुद्धरणचतुरेण योजय
(७) सुरततिमकुटविराजितसुरद्रुमसुरभिकुसुम-
धूलीपरिमलितेन
सुरुचिरतनुसुप्रतीकमदावलसुन्दरक्रमभङ्गि-
हरणचणेन
तरणिकुलोचित(राते ? तर)सिंहासनतलकलित-
तलिमाङ्कमधिशयितेन
परमतपोधनमण्डलमानसपङ्कजालि-
विहारिकलहंसेन योजय

आञ्जनेयकीर्तनम् ।

गानं—११६. सावेरी. चेम्पट.

प. आञ्जनेय! रघुरामदूत! महितानुभाव! पाहि
अ. कुञ्जरवरेण्यायुतसत्त्व!
सुरञ्जितामरमुनीश्वर! सन्ततम् आञ्ज
च. (१) दिनकरभीकरशैशवलील!
दीप्तिविनिर्जितकाञ्चनशैल!
घनदशकन्धरसोदरशूलखण्डनशुभलील!
जनकसुताधिविमोचनलोल!
जम्बुमालिखलनिशिचरकाल!
वनधितरणचण! निजलाङ्गूल-
वह्निदग्धलङ्कानगर! आञ्ज

च. (२) परमभयानकसङ्गरधीर!
प्रबलजवयुत! समीरकुमार!
करतलघातहताक्षकुमार! कपिवरकुलशूर!
सुरनरकिन्नरनुतगुणवार!
सूर्यगृहीतपदागमसार!
सरसकदलीविपिनविहार!
चण्डसिंहिकादलनानुवारम् आञ्ज

(३) विमलमहौषधिशैलानयन!
विश्रुतवीर्य! सुपाटलनयन!
दमितवीरयूपाक्षसंहनन! दलिताशोकवन!
विमतकम्पनकाननदहन!
विकटमुष्टिमूर्छितदशवदन!
कमलनाभशुभचरितनिशमन-
कलितमोदभर! सादरमनुदिनम् आञ्ज

दशावतारकीर्तनम्।

रागमाला।

गानं — ११७. मोहनम्. अटन्त.

च. (१) कमलजास्य! हृतनिगमराशिहयग्रीव-
दमन! मीनशरीर! मामवोदार! कमल

बिलहरी

(२) धृतमन्दरभूधर! दिव्यकूर्मरूप!
पीतसुधामोदितविबुधजात! कमल

धनाशि.

(३) घोरहिरण्याक्षदारण! सूकरा-
कार! वसुधाधार! जगदाधार! कमल

---

१. 'रभस' मुद्रितपाठ.

सारङ्गम्.

च. (४) प्रह्लादावनोपात्तप्रतिभयनृहरिरूप !
प्रह्लादितसज्जन ! दैत्यनिधन ! कमल

मध्यमावती.

(५) कलितवामनरूप ! खण्डितोद्धतमहा-
बलिगर्वजाल ! सुगुणपाल ! कमल

अठाण.

(६) शितधारकुठाररञ्जितबाहो ! हरा-
धीतामितशास्त्र ! रिपुभीम ! भार्गवराम ! कमल

नाटक्कुरिञ्चि.

(७) मनुकुलतिलक ! वञ्चनपरदशकण्ठ-
घनवात ! रघुवीर ! सङ्गरधीर ! कमल

दर्बार्.

(८) सीरसमाकृष्टसारहास्तिनपुर !
घोरप्रलम्बहर ! बलदेव ! शूर ! कमल

आनन्दभैरवी.

(९) नन्दनीयतमबृन्दावनरचित-
कुन्दसायकलील ! बालगोपाल ! कमल

सौराष्ट्रम्.

(१०) कलियुगान्तभाविकल्किरूप ! सजल-
जलदाभनिजशोभ ! पङ्कजनाभ ! कमल

(४. च. शिवकीर्तनानि.)

गानं—११८. काँपि. चेम्पट.

प. शम्भो ! सततं पाहि कृपारस-
सागर ! साम्ब ! विभो !

---

१. 'शील', २. 'दर्बार्' क. पाठः.

अ. जम्भारातिमुखाखिलनिर्जर-
सन्ततानतपदाम्बुरुहाव्यय ! शम्भो !

च. (१) नागविभूषितमङ्गळमूर्त्ते !
नारदादिमुनिसन्नुतकीर्त्ते !
वागमृताहतभक्तजनार्त्ते !
वारिजसममुख ! सद्गुणपूर्त्ते ! शम्भो !

(२) बाहुपरिकलितपरशुकुरङ्ग !
भासुरवृषभाधीशतुरङ्ग !
साहसपरसुरवैरिविभङ्ग !
सर्वलोकनयनाधिहराङ्ग ! शम्भो !

(३) राजतगिरिवरकल्पितखेल !
रतिवरदाह ! जगत्रयपाल !
भ्राजितसोमकलोपमभाल !
पद्मनाभसहजाद्दतलील ! शम्भो !

गानं—११९. भूपाळम्. आदिताळः.

प. पार्वतीनायक ! पाहि मां भाललोचन !
पार्वतीनायक ! पाहि माम्

अ. सर्वलोकैकनाथ ! सरसिजदळनेत्र !
सर्वशं कुरु मम शङ्कर ! सन्ततं पार्वती

च. (१) गङ्गानिर्मितजटाभर ! दक्षमखहर !
गरळकलितगळ ! करधृतमृगवर !
तुङ्गबलमतङ्गदितिजभञ्जनकर !
तुहिनकरशेखर ! विनिहतपञ्चशर ! पार्वती

(२) भानुशशिरथाङ्गयुतभूभिरथ ! शम्भो !
भासमानमेरुचाप ! हे त्वं भो !
दीनरक्षणकृते ! हतपुरवर ! विभो !
देव ! दर्वीकरकृतभूषण ! प्रभो ! पार्वती

च. (३) पुन्नागवनवासकुतुक ! गोपते !
पुरुहूतसुतवरदानविलास ! पुरपते !
खिन्नतरे माय कुरु दयां सुरपते !
खेदमाशु नाशय मामकं भूतपते ! पार्वती

गानं—१२०. शङ्कराभरणं. चेम्पट.

प. नृत्यति नृत्यति साम्बाशिवे। धृक्ट्थों
धृक्ट्थों धृक्ट्थों धृक्ट्थोमिते
अ. नित्यविमलतनुरङ्घ्रिविनतनिज-
भृत्यशुभकरणधीरनुसायं नृत्यति
च. (१) पादशोभिमणिनूपुरविराचेत-
भावुकवणघणराणितमुदितमति-
रादरेण पुरुहूतकलितवरहारि-
वेणुरुतलोलमौलिरिह नृत्यति
(२) नन्दिकेश्वरसुवादितडमरुक-
नन्दनीयडुमुडुमुरवपर ! सुर-
सुन्दरीकरविलोळितचामर-
वृन्द एष शिशुसोमधरो बत नृत्यति
(३) पापहीनमुनिसेवितपदयुग !
पद्मनाभसहजापतिरशरण-
तापदारणपरोऽयमनिन्दित-
धन्यशीलनिवहो गिरिशो बहु नृत्यति

गानं—१२१. पूर्वकल्याणी. चेम्पट.

प. पञ्चबाणतनूहर ! पाहि शम्भो ! सन्ततं
अ. किञ्चन ते कृपया मे खेदमपोहयेश ! पञ्च

च. (१) हेमगिरिशरासन! हेरम्बजनक! भक्त-
कामितदाननिरत! कामसेवित!
सोमपोतधर! तुहिनभूमिधरसुताकान्त!
श्यामरुचिगळराजिसर्पहार! पुरान्तक! पञ्च

(२) कालपाशकृतावृतिकातरमृकण्डुसूनु-
पालन! हतकृतान्त! भद्रदायक!
भालतलशोभिनेत्र! भस्मलेसाखिलगात्र!
शूलपरश्ववपाणे! शोभनवृषभवाह! पञ्च

(३) श्रीकण्ठेशामरकृतक्षीरवारिविमथने
भीकरकाळकूटं त्वं पीतवानहो
श्रीकरनामनिवह! चेतोहरतरकान्ते!
नाकेशनुत! श्रीपद्मनाभसेवकानुकूल! पञ्च

गानं—१२२. शङ्कराभरणं. रूपकम्.

प. कलये पार्वतीनाथं करुणावासं

अ. वलशासनादिविबुधवन्द्यमानपादपाथोजं कलये

च. (१) मकुटविराजितगङ्गं पूर्णमहितकृपामृतापाङ्गं
लोकनिकरमनोमोहनाङ्गं करनीरजशोभिकुरङ्गं
प्रकटितामरवैरिभङ्गं वरबाहुवलयितभुजङ्गं
काममकळङ्कमङ्गळरङ्गं हरमतिपृथुवृषभवरेण्यतुरङ्गं कलये

(२) मल्लिकामुकुळाभरदनं सोममञ्जिममदहरवदनं
शश्वदुल्लसदचलेन्द्रसदनं कृपादूरितसेवककदनं
मल्लाक्षीमानसमदनं बहुमान्यचरितपारिषदान-
न्दनं कल्यनयनविलसदन-
ङ्कुशकनदुदयदनलशलभितमदनं कलये

१. 'हन! प' क. ख पाठः. २. 'चाप्' क. पाठः.

च. (३) शशधरशोभिजटान्त सर्वशमलहृतिपटुपादान्तं
पादविशसितघोरकृतान्तं मुनिविमलहृदयाम्बुजभान्तं
विशरणभवसङ्कटान्तं गुहविघ्नेशविलसदुपान्तम्
अतिविशदसितोपलकान्तं
लोकविदितशुचीन्द्रपुराख्यनिशान्तं कलये

गानं — १२३. कल्याणी. चेम्पट.

प. अद्रिसुतावर! कल्याणशैलशरासन!
मामव शम्भो!

अ. भद्रापारदयाम्बुनिधे! वरपन्नगाभरण!
लोकशरणानिशम् अद्रि

च. (१) देवनदीसमलङ्कृतनिजजट!
दीनलोकपरिपालक! सुविमल-
भावयोगिहृदयाम्बुजनिलय! सु
धावदातमृदुहसित! विभो!
पावनानुपमचरित! निवारित-
पापजाल! विबुधौघविनतपद!
सेवकाखिलविषादहरणचण!
चित्तयोनिदहनातिमहित! पर! अद्रि

(२) शीतभानुपृथुकावतंस! रिपु-
जातवारिधरमारुत! निरुपम!
वीतमोहमदकैतव! पटुतम-
भूतवृन्दपरिवृतसविध!
पूतनामनिकराश्रितजनघन-
पुण्यजाल! रजताद्रिकृतनिलय!
भूतिदायक! मनोज्ञसुगुण! हरि-
सूतिपाशुपतसायकद! सततम् अद्रि

१. 'चूतसायकमनोज्ञ! ह' क ख. पाठः

च. (३) घोरपुरविपिनदाव! मृकण्डुकु-
मारभीतिविनिवारण! शरदिज-
सारसारसदळोपमलोचन!
सामजाजिनदुकूल! विभो!
पूरिताश्रितमनोरथ! शङ्कर!
भारतीशसुरनायकसेवित!
नारदादिसुगेयचरित! पद्म-
नाभसेवकजनानुकूल! परम् अद्रि

गाने—१२४. असावेरी. चेम्पट

प. भगवन्! समयोऽयं मयि भद्रकटाक्ष सकृत्
[कर्तुं भगवन्!

अ. नगजाभूषितवामतनो! प-
न्नगराजालङ्कृतसर्वाङ्ग! भगवन्!

च. (१) चारुकलानिधिलालितकलाप!
चामीकरभूधरवरचाप!
मारवीरकृतकोपाटोप!
महितविमलविज्ञानस्वरूप!
दारितघनदक्षकन्धर! बृन्दारकालिरक्षानिपुण!
मुरारिकृतकटाक्ष! अमृतरसपूरभरितभिक्ष!
नारदाद्युदारपक्ष! वरपरिवार! शारदनीरदनिभशरीर!

वारितविनतजनाखिलशोक!
पूरितवाञ्छितसकलश्रीक!
भूरितापज्जलनिधिनौक!
धृतकोमळपदनाळीक! भगवन्!

(२) भीमगजासुरघनमदहरण!
भीतविनतजनविपदुद्धरण!

सामजवरचर्माम्बरभरण !
सकललोकसम्पूजितचरण !
धामनिधिनिवास ! दरकुन्दाभमन्दहास ! जग-
[दभिराममुखविकास !
अत्यन्तरमणीयवि   र ! भीमभवविरामकर !
सुपर्वसुललामपद   लामविलसदळिक !
हैमवतीमोहन दि . ङ्ग !
अमितदयारसविलसदपाङ्ग !
कोमळकरपरिकलितकुरङ्ग !
कुरु मुदं मम वृषभतुरङ्ग !   भगवन् !

च. (३) कैलासाचलविहरणलोल !
करकमलकलितडमरुकशूल !
भालविलसितज्वलनज्वाल !
लीलाकबळितसुमहाक्ष्वेळ !
कालमदविदार ! अवितमृकण्डुमुनिकुमार !
द्रुहिणकपालकण्ठहार ! आश्रितहृत्पद्मशुभविहार !
हेलिघनरागालिहरणचणनिजमौलिसिंहकेलीधृत-
[सरिद्वर !
हेलानिर्मितविश्वविरोचन !
नालीकारिज्वलनविलोचन !
वेलातीतभवार्तिविमोचन !
विना त्वां मम न गतिः काचन   भगवन् !

गानं—१२५.   द्विजावन्ती.   चेम्पट.

पं.   परमभद्रकर ! पञ्चनदीश ! प्रणतचित्तनिवेश !
अ.   चरणशरणमगतिं जनमेनं चारुकृपार्द्रकटाक्षेण
सकृत् स्नपय हृदयसन्तापं प्रशमय   परम

च. (१) त्वामहं जगतां शरण्यमुपास्य चिरमसह्यसंसृतिबा-
धामनुभवामीति यदिदं तत् किं वा समुचितं
भूमिधरशरासन! विचित्रतरभूतभौतिकसृष्टिविधातु-
र्मामकीनदुरितकर्मसमुदयमखिलमपि विधूय सपदि परम-
क्षेममाकलयितुं बत तव लोकेश्वरस्य
शक्तिरार्य! नो वा परम

(२) काळकूटमुदीक्ष्य दिशि दिशि कान्दिशीकेषु किल [सुरेषु
लीलया कबलयित्वा तं त्रिभुवनं संरक्षितं;
नीलकण्ठ! निखिललोकभयहर! निरुपमाद्भुत!
सुमहानुभाव!
भालनयन! परमेश्वर! किञ्चिदपाङ्गवीक्षण-
साध्ये मदीय-
पालनेऽद्य कः प्रयास इह नृपालमाहितसुमहा-
शक्तेस्तव परम

(३) मृत्युपाशकलितं मुनीन्द्रापत्यमवितुमाशु लिङ्गान्नि-
र्गत्य सदयमपराधिनं तं घनरुषा सन्निगृह्य
अत्यन्तभीतमवनतं तमपाङ्गवीक्षणपात्रमकार्षीः;
नित्यशुद्धबोधरूप! विबुधस्तुत्यचरित!
निरवधिघनतरभव-
मृत्युचकितमतिदीनं तावकभृत्यमिममुपेक्षितु-
मुचितं वा परम

(४) अन्तरा त्वत्स्वरूपं स्फुटमादरेण दर्शयित्वा वि-
भ्रान्तचित्तं मां घनभवपाशमुक्तं मा वितनुषे;
किं तवोदेति न करुणा मयि हन्त दुष्टदुःख
वारयितुं?
दन्तिनं वितीर्य सुलभमतिसमुदयगमनमैरावत- [सन्निभम्
अन्ततः सर्वज्ञ! महेश! किमङ्कुशप्रदानाय [विवादः परम

च. (५) सादरं त्वत्कटाक्षलेशसम्भवश्चेदाखिलं दुःखं
सूदितं स्याद् यथा चान्धं सूर्योदयानन्तरं;
आदिदेव! विमलभाव! परमशिवाखिलामरेश्वर!
वेदवे(द्य!) भालसीम्नि विधिना लिखितं दुरक्षर-
[निकरं ज-
न्मादिदुःखसञ्जनकं ममापि निषूदय प्रमोदम-
[चिरमातनु परम

गानं—१२६. आरभी. चाप्.

प. वन्दे महेश्वरमिन्दुकलाधरं वागीशादिविनुतवैभवं

अ. दन्दशूकनिकरदामशोभितगळं
नन्दनीयशुचीन्द्रनगरनायकमीशं वन्दे

च. (१) भसितद्विगुणितोरुसितभासं वर-
प्रज्ञातीर्थतटान्तकृतवासं पुरो
लसितशम्याकं पालितदासं बुधा-
लघुपापहरमतिमृदुहासं चर्म-
वसनं भूतसंवृतं वासवशुचिकर-
मसदृशमहिमानमम्बिकाप्राणेशं वन्दे

(२) हरिहरसुतगुहपरिवृतं मात-
ङ्गाननपोषकमविरतं वृष-
वरनिजवाहनसेवितं मृदु-
वचननन्दिताशेषसुरजातं लोक-
शरण गङ्गाधरं शान्तयोगिनिषेव्यं
स्मरणीयपदयुगं सामोदं शुभकरं वन्दे

(३) मदनदाहकभालतलनेत्रं त्रिपुर-
मारुतोरगं देवनुतिपात्रं विधु-
वदनं वासुकिकटिसूत्रं कुन्द-
रदनमलङ्कृतराजतगोत्रं लोक-

मुदितरथोत्सवं मोहनतमरूपं
पदनतसदयं श्रीपद्मनाभतोषिण वन्दे

गानं — १२७. आनन्दभैरवी. चेम्पट.

प. पाहि तरक्षुपुरालय! मामयि पावनतरचरित!
अ. देहि तवाङ्घ्रिपयोजरतिं मम
दीनदयापर! देव! पुरान्तक! पाहि
च. (१) भालनयनशलभीकृतमन्मथ!
पाणिविराजितकुरङ्गपरश्वध!
कालमहादववारिद! निरुपम! कञ्जरुचिरचरण!
शैलसुतामुखपङ्कजमधुकर!
सामजचर्मदुकूल! जगन्नुत!
नीलकण्ठ! रिपुपन्नगसमुदय-
नीलकण्ठ! जगदीश्वर! जय जय पाहि
(२) नागवरेण्यविभूषितकन्धर!
नारदशुकसनकादिनिषेवित!
भागधेयभृतलोकनयनपद! भव्यगुणनिवास!
वागधिपानिशवन्दितशुभपद!
वारिजदलनिभनेत्रयुगाव्यय!
रागविनिन्दितबिम्बफलाधर!
राजतगिरिवरवास! महेश्वर! पाहि
(३) कामितवरदा[1]यकामितभुजबल!
कल्याणगिरिवरकार्मुकविलसित!
भीमभवजलनिधितारक! सुरगणभीकरासुरदमन!
सोमकलाञ्चितशेखर!
नतजनशोकतिमिरसमुदायदिनेश्वर!

---

1. 'रिका' क. पाठः.

रामणीयकनिकेत ! वृषासन !
राजराजसख ! शङ्कर ! सन्ततं पाहि

गानं---१२८. मोहनं. झम्प.

प. कृपाकटाक्षं कर्तुं मयि बत किमेवमीश्वर !
पराङ्मुखोऽसि
अ. अपारतापत्रयेण सुतरां
तपामि पञ्चनदीश्वर ! निरवधि- कृपा
च. (१) घोरभीमभवाम्बुराशिमपारमेतं तर्तुं त्वां श्रुति-
सारवेद्यमविज्ञाय कथङ्कारमहं परिशक्नोमि
अगारतनयदारधनपरिवारसुखसम्भरितमिमं सं-
सारमनिशं विचार्य सकलमसारमिति सहसा
[संन्यस्य
मारवीरशासन ! जनकादिविचारणीयममलं तारार्थमुदार-
मन्तरं विज्ञातुं पदसारसं तव शरणं गतवति कृपा
(२) वेदवेद्य ! सदा नु तव शुभपादभजनपरायणेऽस्मिन्
खेदमतिमातनुषे चेदिह को देवः शरणं मे
सादरं समुपेत्य सविधं खेदमखिलमपोह्य
समधिकमोदमाकलयाशु विफलविवादवचनमिदं
तव मास्तु हृदि देवमखिलेशं त्वां भाग्योदयेन
सुपरिवर्ण्य शुकसनकादिसेव्यदिव्यमूर्त्तिसाक्षा-
त्कारमेव चिरकालं वाञ्छति कृपा
(३) तोयजासनगेयविलसदमेयगुणसमुदाय ! भक्तवि-
धेय ! जगदाधेय ! तरणोपाय ! परिविल-
[सदद्भुताधेय
हेयदेहात्ममतिं सपदि विधूय
परमं तव चिद्रूपमयि मम करामलकवद-
पायरहितं सदा विधाय गेयरूप ! भगवन् ! श्रीगौरी-

नायकेन्दुशेखर! निरवधिकश्रेय आशु
कलयितुमवसरमिति भूय एवमनुदिनमाकांक्षति कृपा

(४. छ. सुब्रह्मण्यस्तोत्रम्)

गानं — १२९. केदारगौडं. चाप्पु्.

प. देव! मामयि पाहि षडानन! दिव्यकेकिवाहन! शूर!
अ. सेवकाखिलतापनिवारण!
• श्रीहरिगीतपुरालयदीप! देव
च. (१) तारकासुरदेहविभङ्ग! गभीरतरगमनविजितमातङ्ग!
भूरिकरुणारसराजदपाङ्ग! पूतचरितहृदयाम्बुजभृङ्ग! देव
(२) गङ्गाधरातिमनोज्ञकुमार! खलतरवैरिसमूहविदार!
मङ्गलचरित! पयोधिगभीर! मारजनकभागिनेयोदार! देव
(३) देवसेनाधिप! मञ्जुलशील! दीनतरजनतापालनलोल!
श्रीविजितानङ्ग! मोहनलील! श्रीपद्मनाभहृदयानुकूल! देव

(४. ज. देवीस्तोत्राणि.)

गानं — १३०. नीलाम्बरी. चेम्पट.

प. आनन्दवल्लि! कुरु मुदमविरतम् आनन्दवल्लि!
अ. दीनजनसन्तापतिमिरामृतकिरणायितसुहसे!
धृतशुकपोतविलासिनि! जय परमानन्दवल्लि!
च. (१) जम्भविमतमुखसेवितपदयुगले! गिरिराजसुते! घन-
सारलसिताविधुखण्डसदृशनिटिले!
शम्भुवदनसरसीरुहमधुपे!
सारसाक्षि! हृदि विहर दिवानिशम् आनन्द
(२) केशपाशजितसजलजलदनिकरे! पदपङ्कजसेवक-
खेदजालशमनैकपरमचतुरे!

नाशिताघचरिते! भुवनत्रय-
नायिके! वितर मे शुभमनुपमम् आनन्द

च. (३) शारदेन्दुरुचिमञ्जुलतमवदने! मुनिहृदयनिवासिनि!
चारुकुन्दमुकुलोपमवररदने!
पारिजाततरुपल्लवचरणे!
पद्मनाभसहजे! हर मे शुचम् आनन्द

गानं—१३१. अठाण. अटन्त.

प. श्रीकुमारनगरालये! करुणालये! कमलालये!
अ. श्रितजनकल्पपादपे! श्रीवासुदेव-
वदनाम्बुजमधुपे! श्रीकुमार

च. (१) मञ्जुरणितमणिनूपुरे! करशिञ्जितकङ्कणभासुरे!
मञ्जुळाननसुधाकरे! नवकञ्जदळकलितविलसित-
[चिकुरे!
अञ्जनाञ्चितदृगञ्चलभञ्जितखञ्जनद्वितयमञ्जिम-
पु(ञ्ज? ञ्जे!)निरञ्जनाशयनिकुञ्जकेलिरसिके! अव
[मृगमदातिलके! श्रीकुमार

२) कम्बुवरसदृशकन्धरे! जगदम्ब! पालितवसुन्धरे!
बिम्बफलरुचिधराधरे! लोलम्बजालरुचिविल-
[सितचिकुरे!
अम्बकच्छविविडम्बितदळदसिताम्बुजद्युति-
[कदम्बकटम्बरे!
शम्बरारिहरिशम्बरार्चितपदे! पदनतजनशुभदे! श्रीकुमार

(३) मन्दगमनजितवारणे! सुरव्रजवैरिविनिवारणे!
इन्दिरे! भुवनकारणे! कुरुविन्ददन्ति! किसलय-
[मृदुचरणे!

मन्दहासरुचिनिन्दितेन्दुकरकुन्दवृन्दमकरन्दबिन्दु-
सन्दोहसंवलितसुन्दराम्बुजास्ये ! जगदुपास्ये ! श्रीकुमार

वैराग्यकीर्तनानि ।

गानं—१३२. भैरवी. चेम्पट[1].

